वास्तुपूजापद्धतिप्रकाशः

पूर्व

उत्तर

दक्षिण

पश्चिम

संकलनकर्ता

श्रीस्वामी शान्तिधर्मानन्द सरस्वती

Peacock
Rains
Jayanta
Brahman
Mitra
Arya man
Satya
Appa
Pushan

वास्तु पुरूषा

क्रमांक	पृष्ठ सं.	पंक्ति सं.	अशुद्धिः	शुद्धिः
1	12	22	त्रिष्टुब्छन्दः	त्रिष्टुप्छन्दः
2	15	23	वीरवतीभिः शन्नो	वीरवतीमिशन्नो
3	15	23	रासते	रासताम्
4	21	22	मुखामुखाः	मुखाः
5	36	11	स्वास्ति	स्वस्ति
6	36	1	कृमवयम्	कृमा वयम्
7	41	11	वीरान्नद्र	वीरान्नुद्र
8	43	22	ऐसे	ऐसा
9	53	3	मदुधुघे	मदुघे
10	54	18	कंकतोद्धाः	कंकतोद्भवाः
11	96	5	खाली है	नैर्ऋत्य
12	96	8	खाली है	नैर्ऋत्य
13	102	25	बुहस्पति	बृहस्पति
14	112	8	पृष्ठ संख्या 139	पृष्ठ संख्या 138
15	12	10	पृष्ठ संख्या 140	पृष्ठ संख्या 139
16	130	8	सर	सूर

।।ॐ श्री ॐ।।

वास्तु पूजापद्धतिप्रकाशः

(गृह प्रवेश कर्म विधि)

संकलनकर्ता

श्रीस्वामी शान्तिधर्मानन्द सरस्वती

सत्यं साधना कुटीर

181, ग्रामः गौहरी माफी,

पोः रायवाला, ऋषिकेश.

ईपत्र-swsdsr@gmail.com

web: www.satyamsadhana.org

ग्रन्थनामः-**वास्तुपूजापद्धतिप्रकाशः**

प्रकाशक :- **श्री सत्यं साधना कुटीर समिति,** ऋषीकेश.

प्रथम संस्करण : शनिवार, 7 मार्च 2016,
फाल्गुन कृष्ण त्रयोदशी संवत् 2072.
प्रतियां : 500 (पांचसौ)
प्रधान सम्पादक : स्वामी शान्तिधर्मानन्द सरस्वती
सम्पादक मण्डल: स्वामी सर्वेशानन्द सरस्वती,
पं. ज्योतिप्रसाद उनियाल, और
चौ. विजयपाल सिंहजी.
अक्षर संयोजन : स्वामी शान्तिधर्मानन्द सरस्वती.

पुस्तक प्राप्ति स्थान-
श्री सत्यं साधना कुटीर समिति,
ग्राम-गौहरी माफी, पो. रायवाला, ऋषीकेश
जिला- देहरादून 249205 (उत्तराखण्ड)
दूरभाष संख्या:- 91-9557130251,
ईपत्र-swsdsr@gmail.com
web: www.satyamsadhana.org

सहयोग राशि : 120/=

मुद्रक : सेमवाल प्रिंटिंग प्रेस, ऋषिकेश.

1. प्रस्तावना

इस संसार में प्रत्येक जीव का स्वभाव है कि वह अपने जीवन में एक घर बनाकर उसमें सुख शान्ति पूर्वक सुरक्षित रहना चाहता है। किन्तु मनुष्य की विशेषता यह है कि वह हर कार्य शास्त्र के अनुसार करना चाहता है क्योंकि गीता (16.24) में कहा है -

'तस्मात्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्मकर्तुमिहार्हसि।।

(तुम शास्त्रों में बताये गये विधानों को जानकर ही कर्म करने योग्य हो इसलिये कि कार्य और अकार्य के विषय में शास्त्र ही प्रमाण है।) अन्य प्राणियों की तरह जब मनुष्य अपने लिये एक घर बनाता है तो वह शास्त्र के अनुसार ही बनाना चाहता है। किन्तु जगह की कमी अथवा काम करने की सुविधा अथवा अज्ञानतावश कुछ न कुछ गलत हो ही जाता है तथा अनिवार्य व अपरिहार्य कमियां रह जाती हैं। उन कमियों व दोषों का निवारण करने केलिये निर्माण शुरु करने से पूर्व भूमिपूजन यानि शिलान्यास किया जाता है और निर्माण कार्य पूरा होने के अनन्तर गृहप्रवेश काल में वास्तु पूजन किया जाता है। यह आवश्यक इसलिये है कि एक मकान एक व्यक्ति या एक परिवार के केवल रहने केलिये ही नहीं है किन्तु वह एक कुल - वंश, परंपरा व भावी पीढ़ी को संस्कार प्रदान कर उज्ज्वल भविष्य के निर्माण करने का स्थान है। अतः मनुष्य के संस्कारों के समान मकान के भी संस्कार बताये गये हैं। उन संस्कारों में से एक मुख्य संस्कार को वास्तु शान्ति अथवा गृहप्रवेश कहा जाता है।

इस वास्तु शान्ति में रक्षोघ्नहवन, वास्तुमण्डल देवतापूजन, वास्तुहोम, वास्तुबलि इत्यादि किया जाता है। प्रत्येक वेद के अनुसार वास्तुमण्डल आदि में थोड़ा थोड़ा अन्तर है। इस छोटी सी पुस्तिका द्वारा हमने ऋग्वेदीय, यजुर्वेदीय, सामवेदीय, पौराणिक और आगमिक पद्धतियों के अनुसरण करनेवालों केलिये वास्तुमण्डल, वास्तुपूजा एवं वास्तुहवन आदि की एक सामान्य विधि का दिग्दर्शन कराने केलिये प्रयास किया है। उनमें से सर्व प्रथम सर्व सामान्य पद्धति के अनुसार संकल्पादि दर्शाकर अन्त में अन्य पद्धतियों के अन्तर (भेद) मात्र को यथासंभव दर्शाने का प्रयास किया गया है। अधिक जानकारी केलिये पाठक नारदसंहिता, मत्स्यपुराण, भविष्यपुराण, प्रतिष्ठाकौमुदी, सर्वदेवप्रतिष्ठा प्रकाश:, विश्वकर्मप्रकाश:, नित्यनैमित्तिककर्मसमुच्चय:, आश्वलायनपरिशिष्ट, शौनक कृत ऋग्विधान, रेणुककारिका, पूर्तकौस्तुभ, पूर्तदीधिति, पंचरात्रसंहिता, दैवज्ञवल्लभ, शिल्पशास्त्रं, ज्योति: सागर:, वास्तुप्रदीप: आदि ग्रन्थों का अवलोकन करें।

सर्वेषामात्मा,

स्वामी शान्तिधर्मानन्द सरस्वती

विषयसूची

परिशिष्टभाग:

वास्तु पूजा पद्धति प्रकाशः
(गृहप्रवेशविधिः)

2. अथ प्रथमदिनकर्म :-

यजमान वास्तुपूजन के पूर्वदिन प्रात: यथाविधि स्नान करके अपनी सँस्कृति के अनुसार शुभ्रवस्त्र पहनकर स्वसंप्रदाय के अनुसार तिलक आदि धारण करके शरीरादि की शुद्धि केलिये पंचगव्य का प्राशन करने के बाद नित्य सन्ध्या और इष्टदेवतादि का पूजन करें। तत्पश्चात् शुभ मुहूर्त में पत्नी को वाम भाग में बिठाकर दो बार आचमन करके शान्तिपाठ से कर्म को आरम्भ करें।

2.1) अथ शान्तिपाठ :-

हाथ में अक्षत पुष्पादि ग्रहण करके स्वस्ति वाचन करें-' ॐ **आनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरिता सऽउद्भिदः। देवानो यथासदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे।।1।। देवानां भद्रा सुमतिर्ऋजूयतान्देवानाꣳ रातिरभिनो निवर्तताम्। देवानाꣳसख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे।।2।। तान्पूर्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम्। अर्यमणम्वरुणꣳसोममश्विना सरस्वती नः सुभगामयस्करत्।।3।। तन्नो वातोमयोभुवातु भेषजन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्णया युवम्।।4।। तमीशानञ्जगतस्तस्तुषस्पतिन्धियञ्जिन्वमसे हूमहे वयम्। पूषानो यथा वेदसामसद्वृधेरक्षिता पायुरदब्धः स्वस्तये।।5।। स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।6।। पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वेनो देवाऽअवसागमन्निह।।7।। भद्रं कर्णेभिः**

शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवाꣳस सस्तनूभि र्व्यशेम हि देवहितं यदायुः।।8।। शतमिन्नुशरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः।।9। अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवाऽअदितिः पंचजनाऽअदितिर्जात-मदितिर्जनित्वम्।।10।। तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः। नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः।।11।। आयुष्यं वर्चस्यꣳरायस्पोष- मौद्भिदम्। इदꣳहिरण्यं वर्चस्व जैत्रायाविशतादुमाम्।।12।। द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।।13।। यतो यतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरु प्रजाभ्योऽअभयन्नः पशुभ्यः।।14।। सुशान्तिर्भवतु।। ॐ श्रीमन्महागणाधिपतये नमः।।
ॐ लक्ष्मीनारायणाभ्यां नमः ।। ॐ उमामहेश्वराभ्यां नमः।।
ॐ वाणीहिरण्यगर्भाभ्यां नमः।। ॐ शचीपुरन्धराभ्यां नमः।।
ॐ मातापितृचरणकमलेभ्यो नमः।। ॐ कुलदेवताभ्यो नमः।।
ॐ इष्टदेवताभ्यो नमः।। ॐ ग्रामदेवताभ्यो नमः।।
ॐ स्थानदेवताभ्यो नमः।। ॐ वास्तुदेवताभ्यो नमः।।
ॐ सर्वाभ्यो देवताभ्यो नमः।। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः।।
ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु।।

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।1।

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणयादपि।।2।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते।।3।।

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।4।।

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः।।5।।

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरी नारायणि नमोऽस्तु ते।।6।।

सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं।
येषां हृदिस्थो भगवान्मंगलायतनो हरिः।।7।।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।।8।।

विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरं।
सरस्वतीं प्रणम्यादौ सर्वकार्यार्थ सिद्धये।।9।।

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः।।10।।

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।11।।

ॐ शान्तिः शान्तिः शान्तिः।।

पुनः स्वधर्मपत्नी सहित हाथ में फल, पुष्प, ताम्बूल आदि को ग्रहण कर समस्त देवी-देवताओं की ध्यानपूर्वक प्रार्थना करें -

'ॐ नमो महद्भ्यो नमोऽअर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान् यदि शक्नुवाम मा ज्यायसः शंसमावृक्षि देवाः।।

ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्ठुतैतु।। तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽघ्रियुगं स्मरामि।। सर्वेभ्यो देवेभ्यो नमः, कुलदेवताभ्यो नमः। मया कर्तव्यं इदं सांगवास्तुपूजनकर्म सुमुहूर्तोऽअस्तु।' ब्राह्मण कहें – 'सुमुहूर्तमस्तु।'

समनु प्राणायाम (प्राणायाम मंत्र को मन में बोलते हुए) करके कर्मारम्भ करने केलिये सामान्य संकल्प करें।

2.2) **अथ सामान्य संकल्प :-**

'ॐ विष्णुर्विष्णुर्विष्णुः अस्य श्रीभगवतो महापुरुषस्य श्रीविष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीयपरार्द्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जम्बूद्वीपे भारतवर्षे भरतखण्डे अस्मिन्वर्तमाने व्यावहारिके चान्द्रमानेन प्रभवादि षष्ठीसंवत्सराणां मध्ये...नाम संवत्सरे,...अयने,... ऋतौ,...मासे,...पक्षे,...तिथौ,...वासरयुक्तायां शुभनक्षत्र शुभयोग शुभकरण एवंगुणविशेषणविशिष्टायां शुभतिथौ ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं उत्तरोत्तराभि वृद्ध्यर्थं मया आरब्ध वास्तुपूजनकर्म निर्विघ्नेन परिसमाप्त्यर्थं च महागणपतिपूजां कर्मांगभूत पुण्याह वाचन- वरुणादिदेवता-पूजनपूर्वकं हवनादिकर्म च करिष्ये।'

2.3) **अथ गुरुगणपतिपूजनम् :-**

सूर्यमण्डल में गुरुमण्डल की भावना कर हाथ जोड़कर प्रणाम करें-

'ॐ श्री आदि गुरुभ्यो नमः, ॐ श्री मूलगुरुभ्यो नमः, ॐ श्री वेदव्यासाय नमः, ॐ श्री परात्परगुरुभ्यो नमः, ॐ श्री परमगुरुभ्यो नमः, ॐ श्री गुरुभ्यो नमः।'

तथा गणेशजी का ध्यान कर प्रार्थना करें –

'ॐ गं श्रीमन्महागणाधिपतये नमः,

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः।।
धूम्रकेतुर्गणाध्यक्षः भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते।।

ॐ श्रीमन्महागणपतये नमः, ध्यायामि पूजयामि पुष्पाक्षतानि समर्पयामि नमस्करोमि। ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे वसो मम। आहमजानि गर्भधमात्वमजासि गर्भधम्।।'– शुक्लयजुर्वेदे, (ऋग्वेदे तु –**ॐ गणानान्त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः श्रृण्वन्नूतीभिः सीद सादनम्।**)

2.4) **अथ कलशस्थापनं :-**

कलश स्थापना पूर्वक वरुणादिदेवता का पूजन करें। कलश के आधारभूत अष्टदल कमल को स्पर्श कर इस मन्त्र का पाठ करें– **'ॐ भूरसि भूमिरस्यदितिरसि विश्वधा या विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिꣳसीः।।'** अगले मन्त्र का पाठ करते हुये थोड़े धान्य को कमल पर डालें– **'ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषेधान् देवो वः सविता हिरण्यपाणिः। प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनाम्पयोसि।।'** उस पर तांबे के कलश को स्थापित करें– **'ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विद वः पुनरूर्ज्जानिवर्तस्वसानः। सहस्रं धुक्ष्वोरु**

धारापयस्वती: पुनर्मा विशताद्रयिः।।' अब कलश को जल से भरें- '**ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ सर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽ-ऋतसदनमासीद।'** तत्पश्चात् उसमें गन्ध को समर्पित करें- '**ॐ त्वां गन्धर्वाऽअखनस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत।।'** उसमें सर्वौषधी को डालें- '**ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा। मनैनुवभ्रूणामहं शतं धामानि सप्त च।'** तदनन्तर दूर्वा डालें- '**ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च।।'** अब आम के पांच पत्तों को उसमें रखें- '**ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम्।।'** इसके बाद सप्त मृत्तिका को उसमें डालें- '**ॐ स्योना पृथिवि नो भवानृक्षरान्निवेशनी। यच्छानः शर्म स प्रथाः।।'** तत्पश्चात् पूगीफल (सुपारी) को डालें- '**याः फलिनीर्याऽ-अफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः।।'** उसके बाद पंच रत्नों को डालें- '**ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे।।'** तदनन्तर कलश में दक्षिणा डालें- '**ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।'** पंच पल्लवों से कलश के अन्दर डाली गयी सामग्री को अच्छी तरह से घुमायें और कलश के गले में मौली को बांधें अथवा लाल वस्त्र से कलश को लपेटें- '**ॐ सुजातो ज्येतिषा सह शर्म वरूथमासदत्स्वः। वासोऽअग्ने विश्वरूपं संव्ययस्व विभावसो।।'** और अब पत्तों को चारों दिशाओं में फैलाकर उस पर पूर्णपात्र को रखें -'**ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा ऽइषमूर्जं शतक्रतो।।'** इस प्रकार स्थापित कलश को प्रतिष्ठित

करें- '**मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमन्दधातु। विश्वेदेवास इहमादयन्तामों3 प्रतिष्ठ।।** उसके बाद कलश को हाथ से ढ़ककर निम्न मन्त्रों से अभिमन्त्रित करें-

कलशस्य मुखे विष्णुः कण्ठे रुद्र समाश्रिताः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणा स्मृताः।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपवसुन्धरा।
ऋग्वेदोऽथ यजुर्वेद सामवेदो ह्यथर्वणः।।
अंगैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः।
आयान्तु देव पूजार्थं दुरितक्षयकारकाः।।
सर्वे समुद्राः सरितः तीर्थानि जलदानदाः।
सर्वेऽत्र प्रतितिष्ठन्तु मम कल्याणकारकाः।।

इस प्रकार कलशस्थ जल को अभिमन्त्रित कर अब विशेषतः वरुणदेवता का आवाहन करें- '**ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्त-दाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेहबोध्युरुशं समान आयुः प्रमोषीः।। ॐ भूः वरुण मावाहयामि, ॐ भुवः वरुण-मावाहयामि, ॐ स्वः वरुणमावाहयामि, ॐ भूर्भुवःस्वः वरुण-मावाहयामि।**' अब निम्न मन्त्र से षोडशोपचार पूजन करें-

'ॐ अपांपति वरुणाय नमः।'

3. अथ गृहप्रवेशदिनात्प्राग्दिनकर्म (द्वितीयदिनकर्म) :-

दैनिक सन्ध्यावन्दन देवपूजा आदि करने के बाद दो बार आचमन करके ब्राह्मण से पवित्री ग्रहण कर परमात्मा का ध्यान करें - '**ॐ पवित्रन्ते इत्यस्य मन्त्रस्य परब्रह्मा ऋषिः, त्रिष्टुब्छन्दः, परमात्मा देवता, पवित्रधारणे विनियोगः। ॐ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्तनूनतदामो अश्नुते श्रृतास इद्वहन्तस्तत्समातत।।**' पवित्री को धारण करें।

तत्पश्चात् प्रधान संकल्प करें।

3.1) **अथ प्रधानसंकल्पः -**

'ॐ विष्णुर्विष्णुर्विष्णुः अस्य श्रीभगवतो महापुरुषस्य श्रीविष्णो-राज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीयपरार्द्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जम्बूद्वीपे भारतवर्षे भरतखण्डे अस्मिन्वर्तमाने व्यावहारिके चान्द्रमानेन प्रभवादि षष्ठीसंवत्सराणां मध्ये ...नामसंवत्सरे, ...अयने, ...ऋतौ, ...मासे, ...पक्षे, ...तिथौ, ...वासरयुक्तायां शुभनक्षत्र शुभयोग शुभ करण एवं गुणविशेषणविशिष्टायां शुभतिथौ देवब्राह्मणानां च सन्निधौ मम... गोत्रोत्पन्नस्य... नक्षत्रे... राशौ जातस्य... शर्मणः/वर्मणः/ गुप्तस्य पुत्र पुत्रिकादि समेतस्य मम गृहे स्थितानां शिशुबालवृद्ध प्रभृतिसर्वजनानां अखिलपापक्षयपूर्वक चतुर्विध पुरुषार्थसिद्धिद्वारा परमेश्वरप्रीत्यर्थं, विशेषेण मया निर्मित अस्मिन्नवागारे निर्माणकाले कृतकारितसंभावितभू खननाश्मा-खण्डनदारुच्छेदनादिसकलदोषनिबर्हणार्थं, अस्मिन् गृहे येन केन प्रकारेण प्रविष्टानां रक्षोभूतप्रेतपिशाचब्रह्मराक्षसयक्षाणां दूरे निरसनार्थं, अस्मिन्वास्तौ चिरकालसुखनिवासयुक्ताखिल रोगविघ्नादिशान्तिपूर्वकं सम्पदारोग्यपुत्रपौत्रधनधान्या दिसमृद्धि-पूर्वकं चास्य वास्तोः शुभतासिद्ध्यर्थं, गृहप्रवेश लग्नकाले आदित्यादीनां नवानां ग्रहाणां मध्ये ये ये ग्रहा अशुभस्थानेषु स्थिताः तेषां ग्रहाणां शुभफलावाप्त्यर्थं तथा ये ये ग्रहाः शुभस्थानेषु स्थिताः तेषां ग्रहाणां अतिशयशुभफलावाप्त्यर्थं, अस्मिन्गृहे राजचोरसर्प सिंहशार्दूलव्याघ्रभल्लूकादिसर्वोपद्रव-निवारणार्थं सग्रहमखां वास्तुशान्ति पुरःसरं नवागारप्रवेशाख्यं कर्म करिष्ये। तदंगतया च विहितं स्वस्तिपुण्याहवाचननान्दी-श्राद्धमातृकापूजनादिकर्म आचार्यादिवरणपूर्वकं आदौ निर्विघ्नतार्थं गणेशाम्बिकयोः पूजनं च करिष्ये।।'

गणेशाम्बिका का पूजन करके पुण्याहवाचन करें-

3.2) अथ पुण्याहवाचनं :-

दैनिक गणेशाम्बिकापूजन करके स्थापित कलश की अर्चना करके हाथ जोड़कर प्रार्थना करें- '**ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय। सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।। पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक। पुण्याहवाचनं यावत्तावत्त्वं संन्निधौ भव।।**' जमीन पर घुटने टेक कर अपनी अंजलि को खिले हुये कमलाकार में सिर पर धारण कर बैठें और उस कमलाकार में पुटित अंजलि में ब्राह्मण कलश रखें। तब यजमान प्रार्थना करें -

'त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः।
अतो धर्माणि धारयन्।।
तेनायुःप्रमाणेन पुण्यं पुण्याहं।
दीर्घायुरस्त्विति ब्रुवन्तु।।'

इस प्रकार यजमान कहें, जवाब में ब्राह्मण कहे - '**पुण्यं पुण्याहं दीर्घायुरस्तु**'। ब्राह्मण के हाथ में कलश देकर यजमान कहे - '**सुप्रोक्षितमस्तु, ॐ शिवा आपः सन्तु**', द्विज जवाब दें - '**सन्तु शिवा आपः**'। द्विज के हाथ में पुष्प देकर पुनः यजमान कहे - '**सौमनस्यमस्तु**', द्विज जवाब दें - '**अस्तु सौमनस्यम्**'। द्विज के हाथ में अक्षत देकर पुनः यजमान कहे - '**ॐ अक्षतं चारिष्टं चास्तु**', द्विज जवाब दें - '**अस्त्वक्षतमरिष्टं चास्तु**'। द्विज के हाथ में गन्ध देकर पुनः यजमान कहे - '**ॐ गन्धाः पान्तु**', द्विज जवाब दें - '**अस्तु गन्धं सौमंगल्यं चास्तु**'। द्विज के हाथ में पुनः अक्षत देकर यजमान कहे - '**ॐ अक्षताः पान्तु**' द्विज जवाब दें - '**ॐ आयुष्यमस्तु**', द्विज के हाथ में पुनः पुष्प देकर यजमान कहे - '**ॐ पुष्पाणि पान्तु**', द्विज जवाब दें - '**ॐ सौश्रियमस्तु**'। द्विज के हाथ में ताम्बूल देकर पुनः यजमान कहे - '**ॐ ताम्बूलानि पान्तु**', द्विज

जवाब दें – '**ॐ ऐश्वर्यमस्तु**'। द्विज के हाथ में दक्षिणा देकर पुनः यजमान कहे '**दक्षिणाः पान्तु**', द्विज जवाब दें – '**ॐ बहुधनमस्तु**'। द्विज के हाथ में जल देकर पुनः यजमान कहे – '**ॐ पुनर त्रापः पान्तु**', द्विज जवाब दें – '**ॐ स्वर्चितमस्तु**'। अब यजमान ब्राह्मणों के सामने हाथ जोड़कर कहे – '**ॐ श्रीर्यशोविद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्त्विति ब्रुवन्तु**', अब द्विज जवाब दे (व यजमान पर जल छिड़ककर अभिषेक करें)– '**ॐ श्रीर्यशोविद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु दीर्घमायुः पुष्टिस्तुष्टिश्चास्तु**'। पुनः यजमान द्विजों के हाथ में अक्षत देकर प्रार्थना करें –'**यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहु ऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। ॐ वाच्यतां3**', यजमान पर अक्षत छिड़कते हुये द्विज आशीर्वचन दें – '**ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ।1। देवानां भद्रा सुमतिर्ऋजूयतान्देवानाꣳरातिरभिनो निवर्तताम्। देवानाꣳसख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे ।2। न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत्। यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ।3। दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ।4। द्रविणोदा द्रविण- सस्तुरस्य द्रविणोदाः सनस्य प्रियं सत्। द्रविणोदा वीरवतीभिः शन्नो द्रविणोदा रासते दीर्घमायुः ।5। सविता पश्चात्तत्सविता पुरस्तात्सवितोत्तरा- त्सविताधरातात्। सविता नः सुवतु सर्वतातिं सविता नो रासतान्दीर्घमायुः ।6। नवो नवो भवति जायमानो ऽह्नान्केतुरुषसामेत्यग्रम्। भागन्देवेभ्यो विदधात्यायं प्रचन्द्रमा-**

स्तीरते दीर्घमायुः ।7। उच्चा दिवि दक्षिणावन्तोऽअस्थुर्येऽअश्वदाः सह ते सूर्येण । हिरण्यदाऽअमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्त आयुः ।8।' अब यजमान कहे – '**व्रतजपनियमतपःस्वाध्याय-क्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्**', द्विज बोलें – '**समाहितमनसः स्मः**'। पुनः यजमान कहे – '**प्रसीदन्तु भवन्तः**', द्विज बोलें – '**प्रसन्नाः स्मः**'। अब से आगे यजमान के प्रत्येक वचन के बाद द्विज केवल '**अस्तु**' बोलें। यजमानकलश पर चावल डालता जाय '**ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ तुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ अविघ्नमस्तु, ॐ आयुष्यमस्तु, ॐ आरोग्यमस्तु, ॐ शिवं कर्मास्तु, ॐ कर्मसमृद्धिरस्तु, ॐ वेदसमृद्धिरस्तु, ॐ शास्त्रसमृद्धिरस्तु, ॐ धनधान्य समृद्धिरस्तु, ॐ पुत्रपौत्रसमृद्धिरस्तु, ॐ इष्टसंपदस्तु**, अब चावल को एक पृथकपात्र में डालें – **ॐ अरिष्ट निरसनमस्तु , ॐ यत्पापं यद्रोगं नः अशुभं अकल्याणं तद्दूरे प्रतिहतमस्तु** (चावल बाहर डालें), पुनः कलश पर डालें **ॐ यच्छ्रेयस्तदस्तु, ॐ उत्तरे कर्मणि निर्विघ्नमस्तु, ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु, ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम्, ॐ तिथिकरणमुहूर्तनक्षत्र-ग्रहलग्नसंपदस्तु**।'

अब उदकसेक कर्म करें – '**ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्ना-धिदेवताः प्रीयन्ताम्, ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम्, ॐ दुर्गापांचाल्यै प्रीयेताम्, ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्, ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम्, ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्, ॐ विष्णुपुरोगाः सर्वे वेदाः प्रीयन्ताम्, ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्, ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्, ॐ श्रीसरस्वत्यौ प्रीयेताम्, ॐ श्रद्धामेधे प्रीयेताम्, ॐ भगवती कात्यायनी प्रीयताम्, ॐ भगवती**

माहेश्वरी प्रीयताम्, ॐ भगवती ऋद्धिकरी प्रीयताम्, ॐ भगवती सिद्धिकरी प्रीयताम्, ॐ भगवती पुष्टिकरी प्रीयताम्, ॐ भगवती तुष्टिकरी प्रीयताम्, ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्, ॐ सर्वा कुलदेवताः प्रीयन्ताम्, ॐ सर्वा ग्रामदेवताः प्रीयन्ताम्, ॐ हताश्च ब्रह्मद्विषः, (चावल बाहर डालें)
ॐ हताश्च परिपन्थिनः, ॐ हताश्च विघ्नकर्तारः, ॐ शत्रवः पराभवं यान्तु, ॐ शाम्यन्तु घोराणि, ॐ शाम्यन्तु पापानि, ॐ शाम्यन्त्वीतयः, (पुनः चावल कलश पर डालें)
ॐ शुभानि वर्द्धन्ताम्, ॐ शिवा आपः सन्तु, ॐ शिवा ऋतवः सन्तु, ॐ शिवा ओषधयः सन्तु, ॐ शिवा नद्यः सन्तु, ॐ शिवा गिरयः सन्तु, ॐ शिवा अतिथयः सन्तु, ॐ शिवा अग्नयः सन्तु, ॐ शिवा आहुतयः सन्तु, ॐ अहोरात्रे शिवे स्याताम्, ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम्, ॐ शुक्रांगारकबुधबृहस्पति शनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्, ॐ भगवन्नारायणः प्रीयताम्, ॐ भगवन्पर्जन्यः प्रीयताम्, ॐ भगवान्स्वामी महासेनः प्रीयताम्।' अब यजमान कहे-'ॐ पुण्याहकालान्वाचयिष्ये', द्विज कहें – 'ॐ वाच्यताम्'। यजमान कहे – 'ब्राह्मयं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ।1। भो ब्राह्मणाः मया क्रियमाणस्य वास्तुपूजनाख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।' द्विज तीन बार कहे – 'ॐ पुण्याहम्'। यजमान कहे – 'ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।1। पृथिव्यामुद्धृतायां तु यत्कल्याणं पुराकृतम्। ऋषिभिः सिद्ध-गन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ।2। भो ब्राह्मणाः मया क्रियमाणस्य वास्तुपूजनाख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु', द्विज तीन

बार कहे – '**ॐ कल्याणमस्तु**'। यजमान कहे – '**ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्रायाचार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामःसमृद्ध्यतामुपमादोनमतु।। सागरस्य यथा वृद्धिर्महालक्ष्या-दिभिः कृता। संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः। भो ब्राह्मणाः मया क्रियमाणस्य वास्तुपूजनाख्यस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु**'। द्विज तीन बार कहे – '**ॐ ऋद्ध्यताम्**'। यजमान कहे– '**ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम। दिवम्पृथि-व्याऽअध्यारूहामाविदाम देवान्स्वर्ज्योतिः।1। स्वस्तिस्तु या विनाशाख्या पुण्य कल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः।2। भो ब्राह्मणाः मया क्रियमाणस्य वास्तुपूजनाख्यस्य कर्मणः आयुष्मते स्वस्तिं भवन्तो ब्रुवन्तु**', द्विज तीन बार कहे – '**ॐ आयुष्मते स्वस्ति**'। यजमान कहे – '**ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्ताक्ष्र्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्ददातु।1। समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च मांगल्या तां श्रियं च ब्रुवन्तु नः।2। भो ब्राह्मणाः मया क्रियमाणस्य वास्तु-पूजनाख्यस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु**', द्विज तीन बार कहे – '**अस्तु श्रीः**'। यजमान कहे – '**ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा-मुम्मऽइषाण सर्व लोकम्मऽइषाण।1। अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात्श्री-महागणपति प्रसादाच्च सर्वः परिपूर्णोऽस्तु**', द्विज तीन बार कहे – '**ॐ अस्तु परिपूर्णः**'। अब अविधुर चार द्विज दूर्वा और आम के पत्तों से अभिषेक कर्म करें – (अभिषेक काल में पत्नी यजमान के बायीं ओर बैठें) '**ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।1। ॐ पंच नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधासो देशेऽभव-**

त्सरित् ।2।, ॐ वरुणस्योत्तभनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्य ऽऋत सदनमासीद ।3।, ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।4।, ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचाम्यसौ ।5। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिंचामि ।6। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् अश्विनोर्भैषज्येन तेजसा ब्रह्मवर्चसयाभिषिंचामि। सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिंचामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिंचामि ।7। ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव ।8। धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः। सचेतसो विश्वे देवा यज्ञम्प्रावन्तु नः शुभे ।9। त्वं यविष्टदाशुषो नृःपाहि श्रृणुधी गिरः। रक्षातोकमुतमना ।10। अन्नपतेऽअन्नस्य नो धेह्यनमीवस्यशुष्मिणः प्रप्रदातारन्तारिषऽऊर्जन्नो धेहि द्विपदे शं चतुष्पदे ।11। ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ।12। यतो यतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ।13। अमृताभिषेको ऽअस्तु। शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु' ।14। इसके बाद तीन अथवा पांच पुत्रवती वृद्धसुवासिनियों से आरती कराना है – 'ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मेदाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजामेदाः विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्ये-ऽओजोमेदा विश्वाभ्यो मान्नाष्ट्राभ्यस्पाहि मनारश्वोसि।। अनेन पुण्याहवाचनेन भगवान् प्रजापति (/वास्तुदेवता) प्रीयताम्'।। गौर्यादिषोडशमातृकाओं तथा श्री आदि सप्तघृतमातृकाओं का पूजन करें।

3.3) **अथ नान्दीश्राद्धः –**

वस्त्र, यज्ञोपवीत, चन्दन, अक्षत, पुष्प, धूप, दीप, नैवेद्य, पूगीफल ताम्बूल और दक्षिणा रखकर आचमन और प्राणायाम करके संकल्प करें– **'ॐ विष्णुर्विष्णुर्विष्णुः पूर्वोक्त एवं गुणविशेषणविशिष्टाय शुभतिथौ देवब्राह्मणानां च सन्निधौ अद्य वास्तुपूजनांगत्वे सांकल्पिकविधिना ब्राह्मणयुग्मभोजनपर्याप्तमन्ननिष्क्रयी भूत यथाशक्तिहिरण्येन नान्दीश्राद्धं करिष्ये'।**

पाद्यादि दान करे– **'सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ।1। अमुकगोत्रा मातृपितामही प्रपितामह्यः नांदीमुख्यः ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ।2। अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखा ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः ।3।** (द्वितीयगोत्राः) **मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः पाद्यं पाद प्रक्षालनं स्वाहा संपद्यतां वृद्धिः'** ।4।

आसन दान करें– **'सत्यवसुसंज्ञकानां विश्वेषां देवानां नान्दीमुखानां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ।1। अमुकगोत्राणां मातृपिता महीप्रपितामहीनां नान्दीमुखीनां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ।2। अमुक गोत्राणां पितृपितामहप्रपितामहानां नान्दीमुखानां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः ।3।** (द्वितीयगोत्राणां) **मातामहप्रमातामहवृद्ध प्रमातामहनां सपत्नीकानां नान्दीमुखानां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः**

संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः'।4।

गन्धादि दान करें– 'सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दी-मुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।1। अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दी मुखीभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।2। अमुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।3। (द्वितीयगोत्रेभ्यो) मातामहप्रमातामहवृद्धप्रमातामहेभ्यो सपत्नीकेभ्यो नान्दीमुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः'।4।

भोजननिष्क्रयद्रव्य दान करें– 'सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः इदं ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः।1। अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दी मुखीभ्यः इदं ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः।2। अमुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः इदं ब्राह्मणयुग्मभोजन-पर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः।3। (द्वितीयगोत्रेभ्यो) मातामहप्रमातामहवृद्धप्र-मातामहेभ्यो सपत्नीकेभ्यो नान्दीमुखेभ्यः इदं ब्राह्मणयुग्मभोजन पर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः'।4।

सक्षीर जल दान करें – 'सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखामुखाः ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम् ।1। अमुकगोत्रा मातृपितामहीप्रपितामह्यः नांदीमुख्यः ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्।2। अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखा ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्।3।

(द्वितीयगोत्राः) **मातामह प्रमातामहवृद्धप्रमातामहाः सपत्नीक नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्'**।4।

आशीर्वाद ग्रहण करें - यजमान कहे - **'गोत्रं नो वर्धताम्'**, द्वि कहे - **'वर्धताम् वो गोत्रम्'**। यजमान कहे (सिर ढ़क कर) **'दातारो नोऽअभिवर्धताम्'**, द्विज कहे- **'अभिवर्धताम् वो दातारः'** यजमान कहे- **'वेदाश्च नोऽअभिवर्धन्ताम्'**, द्विज कहे- **'अभिवर्धन्ताम् वो वेदाः'**। यजमान कहे - **'संततिर्नो वर्धताम्** द्विज कहे - **'वर्धताम् वः सन्ततिः'**। यजमान कहे - **'श्रद्धा च न मा व्यगमत्'**, द्विज कहे - **'मा व्यगमत् वः श्रद्धा'**। यजमान कहे - **'बहु देयं च नोऽअस्तु'**, द्विज कहे - **'अस्तु वो देयम्'**। यजमान कहे - **'अन्नं च नो बहु भवेत्'**, द्विज कहे - **'भवतु वो बह्वन्नम्'** यजमान कहे- **'अतिथींश्च लभामहे'**, द्विज कहे- **'लभन्ताम् वोऽअतिथयः'**। यजमान कहे - **'याचितारश्च नः सन्तु'**, द्विज कहे- **'सन्तु वो याचितारः'**। यजमान कहे - **'एषा आशिषः सत्याः सन्तु'**, द्विज कहे- **'सन्त्वेताः सत्याशिषः'**।

दक्षिणा दान दें-**'सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः**।1। **अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयव मूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः**।2। **अमुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः**।3। (द्वितीयगोत्रेभ्यो) **मातामहप्रमातामहवृद्ध-प्रमातामहेभ्यो सपत्नीकेभ्यो नान्दीमुखेभ्यः कृतस्य नान्दीश्राद्धस्य**

फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः' ।4। **'नान्दीश्राद्धं संपन्नं सुसंपन्नमस्तु'** – यह कह कर अगले मन्त्र से विसर्जन करें – **'ॐ वाजे वाजेवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबतमादयध्वं तृप्तायात पथिभिर्देवयानैः'** ।1। इस मन्त्र से अनुव्रजन करें – **'आमा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे। आमागन्तां पितरा मातरा चामा सोमोऽअमृतत्वेन गम्यात्'** ।2। यजमान कहे – **'अस्मिन्नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनात् नान्दीमुखप्रसादाच्च सर्वः परिपूर्णोऽअस्तु'**, द्विज तीन बार कहे – **'अस्तु परिपूर्णः'**।

ब्राह्मणों को आचार्य, ब्रह्मा और ऋत्विग्रूप के कर्म के लिये वरण करें। सर्वप्रथम आचार्य वरण करें।

3.4) अथ आचार्यवरणम्: –

हाथ में गन्धाक्षतपुष्पताम्बूलमुद्रा और वस्त्र लिये हुये निवेदन करें – **'अस्मिन्वास्तुशान्त्यादिहोमपर्यन्तकर्म कर्तुं... गोत्रवन्तं... शर्माणं ब्राह्मणं एभिर्गन्धाक्षतपुष्प ताम्बूलमुद्रावासोभिः आचार्यत्वेन त्वामहं वृणे।'** आचार्य कहें – **'ॐ वृतोऽस्मि। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते'**। उनके हाथों में गन्धादि देकर पुनः प्रार्थना करें – **'ॐ बृहस्पते इत्यस्य मन्त्रस्य गृत्समद ऋषिः, त्रिष्टुप्छन्दः, बृहस्पतिर्देवता आचार्यवरणे विनियोगः। ॐ बृहस्पतेऽअतियदर्योऽर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजाततदस्मासु द्रविणं देहि चित्रम्।। आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः। तथा त्वं मम यज्ञेऽअस्मिन् आचार्यो भव सुव्रत।।'** चन्दनाक्षतपुष्पादि से आचार्यजी की पूजा करें। अब यज्ञ के लिये ब्रह्मा का वरण करें।

3.5) **अथ ब्रह्मवरणम् :-**

हाथ में पुनः गन्धाक्षतपुष्पताम्बूलमुद्रा और वस्त्र लिये हुये निवेदन करें- '**अस्मिन्वास्तुशान्त्यादिहोमपर्यन्तकर्म कर्तुं... गोत्रवन्तं... शर्माणं ब्राह्मणं एभिर्गन्धाक्षतपुष्पताम्बूलमुद्रा वासोभिः ब्रह्मत्वेन त्वामहं वृणे।**' ब्रह्मा कहें - '**ॐ वृतोऽस्मि। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते**'। उनके हाथों में गन्धादि देकर पुनः प्रार्थना करें- '**ॐ ब्रह्मणा ते इत्यस्य मन्त्रस्य विश्वामित्रो ऋषिः, त्रिष्टुप्छन्दः, ब्रह्मा देवता, ब्रह्मवरणे विनियोगः। ॐ ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखिया सधमाद आशु। स्थिरं रथं सुखमिन्द्राधितिष्ठन् प्रजानन् विद्वानुपयाहि सोमम्।। यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः। तथा त्वं मम यज्ञेऽअस्मिन्ब्रह्मा द्विजपते भव।।**' चन्दनाक्षतपुष्पादि से ब्रह्माज़ी की पूजा करें।

अब यज्ञ केलिये अन्य आवश्यक ऋत्विजों का वरण करें।

3.6) **अथ ऋत्विग्वरणम् :-**

एकाग्नि विधि से केवल आचार्य व ब्रह्मा के वरण से कर्म को कर सकते हैं। यदि सामर्थ्य है और आवश्यकता भी हो तो सामर्थ्य व आवश्यकता के अनुसार (23, 15 अथवा 11) जितने ब्राह्मणों को वरण करना है उन्हें उत्तराभिमुख बिठाकर उनके समक्ष हाथ में गन्धाक्षतपुष्पताम्बूलमुद्रा और वस्त्र लिये हुये उनसे निवेदन करें - '**अस्मिन्वास्तुशान्त्यादिहोमपर्यन्तकर्म कर्तुं... गोत्रवन्तं ... शर्माणं ब्राह्मणं एभिर्गन्धाक्षतपुष्पताम्बूलमुद्रावासोभिः ऋत्विक्त्वेन त्वामहं वृणे।**' वे सब कहें - '**ॐ वृताः स्म। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते**'। उनके हाथों में दक्षिणा देकर पुनः प्रार्थना करें - '**ॐ ऋत्विज्यथापूर्व शक्रादीनां मखे भवेत्। यूयं तथा मे**

भवत ऋत्विजोऽर्हथ सत्तमाः।। अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया। सुप्रसन्नैश्च कर्तव्यं कर्म मे विधिपूर्वकम्।।' चन्दनाक्षतपुष्पादि से ऋत्विजों की पूजा करें।

3.7) **अथ मधुपर्कपूजाप्रयोगः-**

यजुर्वेदीय गृह्यसूत्र के अनुसार मधुपर्क से वरण किये गये समस्त ऋत्विजों की पूजा करने का क्रम बताया जा रहा है। (यदि वरण किये गये ब्राह्मण अलग-अलग वेदी हो तो उनकी मधुपर्क पूजा उस-उस वेद के गृह्यसूत्र के अनुसार ही करें)। समस्त ब्राह्मणों को एक पंक्ति में पूर्वाभिमुख बिठायें और स्वयं यजमान उत्तराभिमुख बैठें। यजमान आचमन कर हाथ जोड़कर प्रत्येक ब्राह्मण से प्रार्थना करें - **'ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्'**, द्विज कहे - **'ॐ अर्चय'**। आचार्य जितने ब्राह्मण वरण किये गये हैं उतने विष्टर ग्रहण कर कहे - **'ॐ विष्टरो विष्टरो विष्टरः'** और यजमान को दे, यजमान प्रत्येक से कहे - **'ॐ विष्टरः प्रतिगृह्यताम्'** और उन्हें दे, द्विज यजमान से ग्रहण कर कहे - **'ॐ विष्टरं प्रतिगृह्णामि'**। सभी के द्वारा ग्रहण किये जाने पर सभी द्विज मिलकर कहे और अपने-अपने आसन के नीचे विष्टर को उत्तराग्र रखे - **'ॐ वर्ष्मोऽस्मि समानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाभिदासति।'** आचार्य पाद्यपात्र ग्रहण कर कहे - **'ॐ पाद्यं पाद्यं पाद्यं'** और यजमान को दे, यजमान प्रत्येक से कहे- **'ॐ पाद्यं प्रतिगृह्यताम्'**, द्विज कहे- **'ॐ पाद्यं प्रतिगृह्णामि'**। अब यजमान प्रत्येक द्विज के पहले दाहिने पैर को फिर बायें पैर को क्रमशः इस मन्त्र से धोवे - **'ॐ विराजो दोहोसि विराजो दोहमशीय मयि पद्यायै विराजो दोहः।'** पुनः आचार्य पूर्ववत् विष्टर ग्रहण कर कहे - **'ॐ विष्टरो विष्टरो विष्टरः'** और यजमान को दे, यजमान प्रत्येक से कहे - **'ॐ विष्टरः प्रतिगृह्यताम्'** और उन्हें दे, द्विज

यजमान से ग्रहण कर कहे – '**ॐ विष्टरं प्रतिगृह्णामि**'। सभी के द्वारा ग्रहण किये जाने पर सभी द्विज मिलकर कहे और अपने-अपने पैर के नीचे विष्टर को उत्तराग्र रखे – '**ॐ वर्ष्मोऽस्मि समानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाभिदासति।**' आचार्य अर्घ्यपात्र ग्रहण कर कहे – '**ॐ अर्घोऽर्घोऽर्घः**', और यजमान को दे, यजमान प्रत्येक से कहे – '**ॐ अर्घः प्रतिगृह्यताम्**', द्विज कहे – '**ॐ अर्घं प्रतिगृह्णामि**'। यजमान के हाथ से प्रत्येक द्विज अर्घ्यपात्र को इस मंत्र से ग्रहण करें – '**ॐ आपस्थ युष्माभिः सर्वान्कामानवाप्नुवानि।**' सभी के द्वारा ग्रहण किये जाने पर सभी द्विज मिलकर कहें और जल को भूमि पर गिरायें – '**ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टास्माकं वीरामापरासेचिमत्पयः।**' आचार्य आचमनीय पात्र ग्रहण कर कहे – '**ॐ अचमनीयमाचमनी यमाचमनीयम्**', और यजमान को दे, यजमान प्रत्येक से कहे – '**ॐ आचमनीयं प्रतिगृह्यताम्**', द्विज कहे – '**ॐ आचमनीयं प्रतिगृह्णामि**'। यजमान के हाथ से प्रत्येक द्विज आचमनीयपात्र को ग्रहण कर इस मंत्र से एक बार आचमन करे – '**ॐ आमागन्यशसासꣳसृज वर्चसा तम्मा कुरु प्रियम्प्रजानामधि पतिं पशूनामरिष्टिं तनूनाम्।**' फिर स्मार्त आचमन करें। आचार्य ढके हुये मधुपर्कपात्र को ग्रहण कर कहे – '**ॐ मधुपर्कं मधुपर्कं मधुपर्कम्**', और यजमान को दे, यजमान प्रत्येक से कहे – '**ॐ मधुपर्कं प्रतिगृह्यताम्**', द्विज कहे – '**ॐ मधुपर्कं प्रतिगृह्णामि**'। यजमान के हाथ में स्थित मधुपर्कपात्र को खोलकर इस मंत्र से देखें – '**ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे।**' और इस मंत्र से यजमान के हाथ से ले– '**ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्याम्पूष्णो हस्ताभ्यां प्रतिगृह्णामि।**' अपने बायें हाथ में रखकर दाहिने हाथ की अनामिका व अंगुष्ठ से प्रदक्षिणा के क्रम से एक

बार आलोडन कर थोड़ा जमीन पर गिरायें फिर दो बारा मन्त्र का पाठकर पुनः थोड़ा जमीन पर गिराये – **'ॐ नमः स्यावास्यायान्नशनेयत्त आविद्धं तत्ते निष्कृन्तामि।'** तत्पश्चात् इस मंत्र से तीन बार अनामिका और अंगुष्ठ से प्राशन करके शेष को खायें – **'ॐ यन्मधुनो मधव्यं परमꣳरूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि।'** तदनन्तर स्मार्तविधि से आचमन कर निम्न विधि से अपने अंगों को कराग्र से स्पर्श करें– **'ॐ वाङ्मे आस्येऽअस्तु** (मुख)', **'ॐ नसो मे प्राणोऽअस्तु** (दोनों नासिका छिद्र)', **'ॐ अक्ष्णोर्मेचक्षुरस्तु** (दोनों आंख)', **'ॐ कर्णयोर्मे श्रोत्रमस्तु** (दोनों कान)', **'ॐ बाह्वोर्मे बलमस्तु** (दोनों बाहु)', **'ॐ ऊर्वोर्मे ओजोऽ अस्तु** (दोनों जांघ)', **'ॐ अरिष्टानि मेऽअंगानि तनूस्तन्वा मे सह सन्तु** (पूरे शरीर को दोनों हाथों से स्पर्श करे)। हस्तप्रक्षालन कर आचमन करे।

आचार्य कहे – **'ॐ गौर्गौर्गौः'**, यजमान कहे – **'ॐ गौः प्रतिगृह्यताम्'**, द्विज कहे– **'ॐ गौः प्रतिगृह्णामि, ॐ माता रुद्राणां दुहिता वसूनांꣳस्वसाऽआदित्यानाममृतस्य नाभिः। प्रणुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ठ।। मम** अमुष्य **यजमानस्य चोभयोः पाप्मा हतः ॐ'**।

पुनः जोर से कहे – **'ॐ उत्सृजत तृणान्यत्तु।'**

3.8) अथ प्रार्थना :-

सभी ब्राह्मणों के समक्ष हाथ जोड़कर प्रार्थना करे –

'ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः।
वेदानां चैव दातारस्त्रातारः सर्वदेहिनाम्।1।
जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः।
देवानां च पितृणां च तृप्त्यर्थं याजकाः स्मृताः।2।

येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्।
रक्षन्तु सततं तेषां जपयज्ञं व्यवस्थिताः ।3।
ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतम्।
येषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ।4।
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः।
सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ।5।
श्रोत्रियाः सत्यवाचश्च देवध्यानरताः सदा।
यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ।6।
अंगीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः।
यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ।7।
यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः।
अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ।8।
देवध्यानरता नित्यं प्रसन्नमनसः सदा।
अदुष्टभाषणा नित्यं मा सन्तु परनिन्दकाः ।9।
ममापि नियमा ह्येते भवन्तु भवतामपि ।10।

आचार्यजी से विशेष प्रार्थना –)

मन्त्रमूर्तिर्भवान्नाथ संसारोच्छेदकारक।
सांगं कर्म यथा मे स्यात्तथा कुरु हि भूसुर ।1।
संसारभयभीतेन अयं यज्ञः सुभक्तितः।
प्रारब्धस्त्वत्प्रसादेन निर्विघ्नं मे भवत्विति ।2।
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया।
सुप्रसादेन कर्तव्यं शान्तिकं विधिपूर्वकम् ।3।

3.9) **अथ आचार्य कर्म :-**

आचमन कर प्राणायाम करके देशकाल का कथन करे – **'अस्मिन् वास्तुशान्त्यादिकर्मणि यजमानेन वृतोऽअहमाचार्यकर्म करिष्ये'** ऐसे संकल्प करके पीलीसरसों अथवा लाजा (खील) से इन वैदिकमंत्रों से दिग्रक्षण करें– **'रक्षोहणो वलगहन: प्रोक्षामि वैष्णवान्रक्षोहणो वलगहनोऽवनयामि वैष्णवान्यवोऽअसि यवयास्मद्द्वेषो यवयाराती रक्षोहणो वलगहनोऽअवसृणामि वैष्णवान्र क्षोहणो वलगहनोऽअभिजुहोमि वैष्णवान्रक्षोहणौ वलग हनावुपदधामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी रक्षोहणौ वलगहनौ परिसृणामि वैष्णवी रक्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वद'**।

'अपसर्पन्तु ते भूता ये भूता विघ्नकारका:।
ये भूता विघ्नकर्तार: ते नश्यन्तु शिवाज्ञया।।
अपक्रामन्तु भूताद्या: सर्वे ये भूमिभारका:।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे'।।

'ॐ अन्तरिक्षश्छअन्तरिक्षों त्वरिता अरातय: ॐ हुं फट् स्वाहा'। यजमान के हाथ पर रक्षाबन्धन कर तिलक लगाकर यथाविधि पंचगव्य को निम्न प्रकार से तैयार करें। पंचगव्यसामग्री– (विष्णुधर्मोत्तरपुराण के अनुसार)

'गोमूत्रं भागतश्चार्धं शकृत्क्षीरस्य च त्रयम्।
द्वयं दध्नो घृतस्यैकमेकश्च कुशवारिज:।।'

अर्थात् जितनी मात्रा कुशा से पवित्र किया गया जल लेंगे उतना ही घी, उसका दो गुना दही, उसका तीन गुना दूध, उसकी आधी मात्रा गोबर और आधी मात्रा ही गोमूत्र को अलग-अलग ग्रहण करें। तत्पश्चात् शुद्ध व पवित्रीकृत देश में अष्टदल पद्म लिखकर उसके ऊपर चावल से भरे एक बड़े बर्तन को स्थापित

करें, उस चावल पर क्रमशः पूर्व दिशा में गोमूत्र, दक्षिण में गोमय, पश्चिम में दूध, उत्तर में दही, मध्य में घी और ईशान में कुशोदक को स्थापित करें। विधिः -(भविष्यपुराण के अनुसार)

पंचगव्यं पवित्रन्तु आहरेत्ताम्रभाजने।
गायत्र्या चैव गोमूत्रं गन्धद्वारेण गोमयं।।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि।
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्।।

अर्थात् तांबे के बर्तन में ही पंचगव्य का मिश्रण करना चाहिये। गायत्री मन्त्र से गोमूत्र में, गन्धद्वारा इत्यादि मन्त्र से गोबर में, आप्यायस्व इत्यादि मन्त्र से दूध में, दधिक्राव्णा इत्यादि मन्त्र से दही में, तेजोऽसि शुक्रं इत्यादि मन्त्र से घी में और देवस्य त्वा इत्यादि मन्त्र से जल में उन मन्त्रों के विनियोग पूर्वक देवता का आवाहन करें।

'सविता देवता मूत्रे गोमये वायुदैवतं।
सोमः क्षीरे दध्नि शुक्रः घृते चाग्निरुदाहृतः।
कुशोदकेषु गन्धर्वः क्रमेणैषां तु देवताः।'

अर्थात् गोमूत्र में सविता, गोबर में वायु, दूध में सोम, दही में शुक्र, घी में अग्नि और कुशोदक में गन्धर्व देवता का ध्यान /भावना करे।

(क) गायत्रीमन्त्र से गोमूत्र में सविता का आवाहन करें -

'ॐ अस्य गायत्रीमन्त्रस्य विश्वामित्र ऋषिः, गायत्री छन्दः, सविता देवता, पंचगव्यनिर्माणकर्मणि विनियोगः। ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। गोमूत्रे सवितारमावाहयामि।

(ख) गन्धद्वारा मन्त्र से गोबर में वायु का आवाहन करें -

'ॐ अस्य गन्धद्वारेति मन्त्रस्य आनन्दकर्दम ऋषिः,

अनुष्टुप्छन्दः, चिक्लीतो देवता, पंचगव्यनिर्माणकर्मणि विनियोगः। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। गोमये वायुमावा-हयामि।'

(ग) आप्यायस्व मन्त्र से दूध में सोम का आवाहन करें –

'ॐ अस्य आप्यायस्वेति मन्त्रस्य गौतम ऋषिः, गायत्री छन्दः, सोमो देवता, पंचगव्यनिर्माणकर्मणि विनियोगः। ॐ आप्यायस्व समे तु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे। क्षीरे सोममावाहयामि।'

(घ) दधिक्राव्णा मन्त्र से दही में शुक्रका आवाहन करें –

'ॐ अस्य दधिक्राव्णोति मन्त्रस्य वामदेवो ऋषिः, अनुष्टुप्छन्दः, दधिक्रावा देवता, पंचगव्यनिर्माणकर्मणि विनियोगः। ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रणऽआयूंषि तारिषत्। दधिनि शुक्रमावाहयामि।'

(ङ) तेजोऽसि मन्त्र से घी में अग्नि का आवाहन करें –

'ॐ अस्य तेजोऽअसीति मन्त्रस्य परमेष्ठी ऋषिः, गायत्री छन्दः, आज्यं देवता, पंचगव्यनिर्माणकर्मणि विनियोगः। ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि। प्रियन्देवाना मनां धृष्टन्देवयजमनसि। आज्येऽअग्निमावाहयामि।'

(च) देवस्य त्वा मन्त्र से कुशोदक में गन्धर्व का आवाहन करें –

'ॐ अस्य देवस्य त्वेति मन्त्रस्य ऐतरेय ऋषिः, अनुष्टु-प्छन्दः, सविताश्विनौ देवते, पंचगव्यनिर्माण कर्मणि कुशोदकपूरणे विनियोगः। ॐ देवस्य त्वा सवितुः प्रसवेऽ-श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां।। कुशोदके गन्ध र्वमावाह-यामि।' यथाशक्ति अथवा कम से कम पंच उपचारों से आवाहित देवताओं का पूजन कर इन्हीं मन्त्रों से एक पात्र में

डालकर 7 दर्भों से निर्मित ब्रह्मकूर्च अथवा पलाश की समिधा से '**मन्थता**' मन्त्र से मथन करें -

'ॐ अस्य मन्थतेति मन्त्रस्य गाधि विश्वामित्र ऋषिः, त्रिष्टुप्छन्दः, अग्नि देवता, पंचगव्य मथने विनियोगः। ॐ मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम्। यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम्।'

पंचगव्य से यजमान पर और गृह (घर) में निम्न मन्त्र से प्रोक्षण करें -

'ॐ अस्य एतोन्विन्द्रमिति मन्त्रस्य तृचस्यांगिरस ऋषिः, अनुष्टुप्छन्दः, तिरश्ची इन्द्रो देवता, गृहप्रोक्षणे विनियोगः। ॐ एतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वा वृध्वांसं शुद्ध आशीर्वान्ममत्तु ।1। **इन्द्र शुद्धो न आगहि शुद्ध शुद्धाभिरूतीभिः। शुद्धो रयीं निधारय शुद्धो ममद्धि सोम्यः** ।2। **इन्द्र शुद्धो हि नो रयीं शुद्धो रत्नानि दाशुषे'** ।3।

अब प्रादेशकरणान्त कर्म करें -

'ॐ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम्। असुघ्नमिन्द्रसखं समत्सुबृहद्यशो नावमि वारुहेम 1। **अंहोमुच-मांगिरसं गयं च स्वस्त्यात्रेयं मनसाच तार्क्ष्यम्। प्रयतपाणिशरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नोऽअस्तु** ।2।

तत्पश्चात् भूमिपूजन करें। जमीन पर गन्धाक्षतपुष्प रखें -

'ॐ अस्य स्योनेति मन्त्रस्य वराह ऋषिः, गायत्री छन्दः, भूदेवी देवता, भूप्रार्थने विनियोगः। ॐ स्योना पृथिवि नो भवानृक्षरा-न्निवेशिनी। यच्छा नः शर्म सप्रथाः।'

दाहिने हाथ में जल लेकर बाये हाथ से ढककर -

'ॐ धनुर्धराय विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धराः प्रचोदयात्।' 12 बार इस मन्त्र के जपपूर्वक जल को अभिमन्त्रित कर जमीन पर प्रोक्षण करे। पृथिवी के आवाहन कर्म हेतु गन्ध

पुष्पाक्षत अर्पण करे -

आगच्छ देवि कल्याणि वसुधे लोकधारिणि।
पृथ्वि त्वं ब्रह्मदत्तासि काश्यपेनाभिवन्दिता।1।

भूतधात्री रत्नगर्भा विपुला सागराम्बरा।
अस्मिन्यज्ञे महादेवि विघ्नं विध्वंसयाम्बिके।2।

अब '**ॐ भूम्यै नमः**' मन्त्र से पाद्यादि समर्पित करें। तदनन्तर निम्नमन्त्र का पाठ करते हुय गन्धाक्षतपुष्पादि से शेष पूजा करे -

'ॐ लं पृथिव्यै नमः।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियां।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्।1।

विष्णुशक्ति समोपेते स्वर्णवर्णे महीतले।
अनेकरत्नसंभूते भूमिदेवि नमोऽस्तु ते।2।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्।3।

पुनः प्रार्थना पूर्वक अर्घ्य दें -

ॐ उद्धृतासि वराहेण विष्णुना शतबाहुना।
दंष्ट्राग्रे लीलया देवि यज्ञार्थे त्वां वृणोम्यहम्।1।

ब्रह्मणा निर्मिते देवि विष्णुना शंकरेण च।
पार्वत्या चैव गायत्र्या स्कन्देन श्रवणेन च।2।

यमेन पूजिता देवि धर्मवृद्धिजिगीषया।
सौभाग्यं देहि पुत्रांश्च धनं रूपं च पूजिता।3।

गृहाणार्घ्यं च मे देवि सौभाग्यं च प्रयच्छ मे।4।

कीलबन्धन करे -

तत्पश्चात् चारों दिशाओं में पीपल/गूलर/पलाश के एक बित्ता (12

अंगुल) लम्बे 10 कीलों को '**ॐ नमः सुदर्शनायास्त्राय फट्**' इ
मन्त्र के 108 बार जपके द्वारा अभिमन्त्रित कर निम्न मन्त्रों
आवृत्ति पूर्वक पाठ करते हुये बांध दें।

'ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यन्तरिक्षगाः।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु।1।
मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः।
अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे।2।

पुनः '**ॐ नमः सुदर्शनायास्त्राय फट्**' मन्त्र से प्रत्येक
कील का पंचोपचार पूजन करके उनमें इन्द्र आदि लोकपालों का
आवाहन कर पंचोपचार पूजन करें। गृह रक्षार्थ मौलीसूत्र अथवा मूंज
आदि से निर्मित रस्सी से पूरे भवन को प्रदक्षिणा के क्रम से बांधें
पीली सरसों को बाये हाथ में रखकर दाहिने हाथ से ढक कर निम्न
वैदिक और स्मार्त मन्त्रों का पाठ करें - '**ॐ रक्षोहणं वलगहनं
वैष्णवीमिदमहन्तं वलगमुत्किरामि। यम्मे निष्ट्यो यममात्यो
निचखानेदमहन्तं वलगमुत्किरामि। यम्मे समानो यमसमानो निच-
खानेदमहन्तं वलगमुत्किरामि। यम्मे सबन्धुर्यमसबन्धु र्निचानेद-
महन्तं वलगमुत्किरामि। यम्मे सजातो यमसजातो निचखानो-
त्कृत्याङ्किरोमि।1। ॐ रक्षोहणो वा वलगहनः प्रोक्षामि
वैष्णवान्रक्षोहणो वो वलगहनो वनयामि। वैष्णवान्रक्षोहणो
वलगहनो वस्तृणामि। वैष्णवान्रक्षोहणौ वां वलगहनाऽउपदधामि
वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि। वैष्णवी वैष्णवमसि
वैष्णवास्थ।2। ॐ रक्षसाम्भागोसि निरस्तꣳरक्षऽइदमहꣳरक्षोभि
तिष्ठामीदमहꣳवबाध इदमहꣳरक्षो धमन्तमोनयामि।3। ॐ
रक्षोहा विश्वचर्षणिरभियोनिमयोहते। द्रोणे सधस्थमासदत्।4।**
तथा

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।1।
अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे।2।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु।3।
भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः।
स्थानाद्व्रजन्त्वन्यत्र भो स्वीकरोमि भुवं त्विमाम्।4।
भूतानि राक्षसा वापि अत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु शान्तिकं तु करोम्यहम्।5।'

दसों दिशाओं में बिखेरते हुये कहे –

'देवा आयान्तु, यातुधाना अपयान्तु, विष्णो देवयजनं रक्षस्व।'

पूर्व में तैयार किये गये पंचगव्य को प्रणव से पुनः आलोडन कर निम्न वारुणमन्त्रों से कर्मभूमि पर प्रोक्षण करें –

**'ॐ हिरण्यवर्णाः शुचयः पावकायासुजातः कश्यपो यास्विन्द्रः।
अग्निं या गर्भं दधिरे विरूपास्तान आपः शꣳस्योना भवन्तु।1।
ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवोभवानः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे, स्वाहा।1। वास्तोष्पते शग्मया संसदाते सक्षीमहिरण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिस्सदा नः, स्वाहा।2। अमीवहा वास्तोष्पते विश्वारूपाण्यविशन्। सखा सुषेव एधि नः, स्वाहा।3। वास्तोष्पते प्रतरणो न एधि गयस्भानो गोभि रश्वेभिरिन्दो। अजरासस्ते सख्येस्याम पितेव पुत्रान्प्रति नो जुषस्व, स्वाहा।4।

(उक्त 4 मन्त्रों सहित निम्न मन्त्र से बिल्वखण्ड अथवा अन्य फल की आहुति दें)

ॐ वास्तोष्पते ध्रुवास्थूणां सत्रं सोम्यानाम्।
द्रप्सोभेत्तापुरां शश्वतीना मिन्द्रो मुनीनां सखा, स्वाहा।5।

विशेष ध्येयः- यजुर्वेदीय वास्तुमण्डल देवताओं के नामों को चतुर्थ्यन्त के साथ होम केलिये मूलभाग में ही दर्शाया गया है।

4. आगमोक्तवास्तुमण्डलदेवताः

(चित्र संख्या 5, पृ. सं. 137 में दर्शाये गये मण्डल को पीठ पर निर्माण करके चित्र संख्या 4 पृ. सं. 137 में दर्शाये गये रंगों को भर कर चित्र सं. 5 में दर्शाये गये संख्या क्रम से आवाहनादि करें।)

1अ. **ॐ वास्तुपुरुषाय नमः**, 1. **ॐ ईशानाय नमः**, 2. **ॐ पर्जन्याय नमः**, 3. **ॐ जयन्ताय नमः**, 4. **ॐ इन्द्राय नमः**, 5. **ॐ सूर्याय नमः**, 6. **ॐ सत्याय नमः**, 7. **ॐ भृशाय नमः**, 8. **ॐ अन्तरिक्षाय नमः**, 9. **ॐ अग्नये नमः**, 10. **ॐ पूष्णे नमः**, 11. **ॐ वितथाय नमः**, 12. **ॐ गृहक्षताय नमः**, 13. **ॐ यमाय नमः**, 14. **ॐ गन्धर्वाय नमः**, 15. **ॐ भृंगराजाय नमः**, 16. **ॐ मृगाय नमः**, 17. **ॐ पितृभ्यो नमः**, 18. **ॐ दौवारिकाय नमः**, 19. **ॐ सुग्रीवाय नमः**, 20. **ॐ पुष्पदन्ताय नमः**, 21. **ॐ वरुणाय नमः**, 22. **ॐ असुराय नमः**, 23. **ॐ शोषाय नमः**, 24. **ॐ रोगाय नमः**, 25. **ॐ वायवे नमः**, 26. **ॐ नागाय नमः**, 27. **ॐ मुख्याय नमः**, 28. **ॐ भल्लाटाय नमः**, 29. **ॐ सोमाय नमः**, 30. **ॐ अर्गलाय नमः**, 31. **ॐ दित्यै नमः**, 32. **ॐ अदित्यै नमः**, 33. **ॐ आपाय नमः**, 34. **ॐ आपवत्साय नमः**, 35. **ॐ अर्काय नमः**, 36. **ॐ सवित्रे नमः**, 37. **ॐ सावित्राय नमः**, 38. **ॐ विवस्वते नमः**, 39. **ॐ इन्द्राय नमः**, 40. **ॐ इन्द्रजयाय नमः**, 41. **ॐ मित्राय नमः**, 42. **ॐ रुद्राय नमः**, 43. **ॐ रुद्रजयाय नमः**, 44. **ॐ महीधराय नमः**, 45. **ॐ ब्रह्मणे नमः**, 46. **ॐ शर्वसन्ध्याभ्यां नमः**, 47. **ॐ अर्यमाय नमः**, 48. **ॐ जम्भकाय नमः**, 49. **ॐ पिलिपिच्छाय नमः**, 50. **ॐ चरक्यै नमः**, 51. **ॐ विदार्यै नमः**, 52. **ॐ पूतनायै नमः**, 53. **ॐ पापराक्षस्यै नमः**, 54. **ॐ देवग्रहेभ्यो नमः**, 55. **ॐ असुरग्रहेभ्यो नमः**, 56. **ॐ गन्धर्वग्रहेभ्यो नमः**, 57. **ॐ यक्षग्रहेभ्यो नमः**, 58. **ॐ पितृग्रहेभ्यो नमः**, 59. **ॐ नागग्रहेभ्यो नमः**, 60. **ॐ राक्षसग्रहेभ्यो नमः**, 61. **ॐ पिशाचग्रहेभ्यो नमः**।

4 .1 आगमोक्तान्वाधानम्

आगमिक पद्धति से अग्नि उत्पत्ति की विधिः -

रुद्रयामल तन्त्रोक्त देवीरहस्य (11.7-17) के अनुसार आगम पद्धति से अग्नि स्थापना करने की यह विधि है।

'पूर्वस्यां दिशि सद्यन्त्रान्खनेत्कुण्डं त्रिकोणकम्।
हस्तैकविस्तृतं चाधो हस्तैकपरिमाणतः।।'

अर्थात् पूर्वदिशा में एक त्रिकोण कुण्ड (अन्य तन्त्र शास्त्र में योनि कुण्ड का भी विधान है।) का खनन करें। वह कुण्ड यजमान के हाथ के अनुसार तीनों भुजायें एक-एक हाथ लम्बी और एक हाथ गहरी होना चाहियें।

'कुण्डेऽस्मिन् विलिखेद्यन्त्रं त्र्यश्रं बिन्दुविराजितम्।
षट्कोणमष्टपत्रं च त्रिवृतं भूगृहांकितम्।।
ततः पूजां चरेत् देवि कुण्डचक्रस्य पार्वति।
यथोक्तविधिना येन साधको दीक्षितो भवेत्।।'

अर्थात् इस त्रिकोण कुण्ड में त्रिकोण बनाकर उसके मध्य में बिन्दु का अंकन करे। उसके बाहर षट्कोण, अष्टदल, तीनवृत्त और भूपुर बनाये। हे पार्वति! कुण्डस्थ चक्र की पूजा साधक अपनी दीक्षा में जिस प्रकार बताया गया है उस विधि के अनुसार ही करे। अथवा निम्न सामान्य विधि से करे -

'गणेशधर्मवरुणाः कुबेरसहितास्तथा।
चतुर्द्वारेषु सम्पूज्याश्चत्वारो द्वारपालकाः।।'

अर्थात् भूपुर के चारों द्वार पर पूर्वादि क्रम से गणेश, यम, वरुण और कुबेर की आवाहनादि पूर्वक पूजा करे - **ॐ गं गणेशाय नमः, ॐ यं यमाय नमः, ॐ वं वरुणाय नमः, ॐ कुं कुबेराय नमः।**

'माया च मोहिनी मत्ता माध्वी वह्निवल्लभा।
वर्तुली वीरसूर्वाम्या पूज्या अष्टदलस्थिताः।।'

अर्थात् अष्टदल में माया, मोहिनी, मत्ता, माधवी, वह्निवल्लभा, वार्ताली, वीरसू और वाम्या का पूजन करे। **ॐ मां मायायै नमः, ॐ मों मोहिन्यै नमः, ॐ मं मत्तायै नमः, ॐ मां माधव्यै नमः, ॐ वं वह्निवल्लभायै नमः, ॐ वां वार्ताल्यै नमः, ॐ वीं वीरसुवे नमः, ॐ वां वाम्यायै नमः।**

'अम्बालिकाम्बाबगला छिन्नशीर्षाम्बिका भगा।
षट्कोणमध्यगाः पूज्याः कुण्डचक्रे महेश्वरि।।'

अर्थात् हे महेश्वरि! कुण्डचक्र में स्थित षट्कोण में अम्बालिका, अम्बा, बगला, छिन्नशीर्षा, अम्बिका और भगा का पूजन करे। **ॐ ह्रीं अम्बालिकायै नमः, ॐ ह्रीं अम्बायै नमः, ॐ ह्रीं बगलायै नमः, ॐ ह्रीं छिन्नशीर्षायै नमः, ॐ ह्रीं अम्बिकायै नमः, ॐ ह्रीं भगायै नमः।**

'वह्निं वैश्वानरं चाग्निं त्रिकोणे पूजयेच्छिवे।
स्वाहाभगवतीं बिन्दौ जातवेदसमर्चयेत्।।'

अर्थात् हे शिवे! त्रिकोण में वह्नि, वैश्वानर और अग्नि की पूजा करे। **ॐ वह्न्यै नमः, ॐ वैश्वानराय नमः, ॐ अग्नये नमः।** तथा बिन्दु में स्वाहा और जातवेद की पूजा करें। **ॐ स्वाहायै नमः, ॐ जातवेदसे नमः।**

'अग्निं मूलेन देवेशि वह्नेर्दशकलास्ततः।
तारं वह्निः शिवोऽब्धिश्च हृज्जं शक्तिर्महेश्वरि।।

अर्थात् हे देवेशि! हे महेश्वरि! बिन्दु में ही अग्नि की दस कलाओं का पूजन करे। **ॐ यं धूम्रार्चिषे नमः, ॐ रं ऊष्मायै नमः, ॐ लं ज्वलिन्यै नमः, ॐ वं ज्वालिन्यै नमः, ॐ शं विस्फुलिंगिन्यै नमः, ॐ षं सुश्रियै नमः, ॐ सं सुरूपायै नमः, ॐ हं कपिलायै नमः, ॐ ळं हव्यवाहिन्यै नमः, ॐ क्षं कव्यवाहिन्यै नमः।** संपूर्ण चक्रका पूजन निम्न मन्त्र से करे -

'अग्ने वैश्वानरं ब्रूयाज्जटाभारेति संवदेत्।
भास्वरेति त्रिनेत्रेति ज्वालामुखपदं वदेत्।।

प्रज्वलेति युगं ब्रूयात्जातवेदसि संवदेत्।
ठद्वयं च संवेदने मन्त्रोऽयं वह्निवल्लभः।।'

अर्थात् अग्नि का यह प्रिय मूलमन्त्र है '**ॐ रं गं रूं जं सौः अग्ने वैश्वानर जटाभार भास्वर त्रिनेत्र ज्वालामुख प्रज्वल प्रज्वल जातवेद ठः ठः स्वाहा/नमः।**' अब कुण्डस्थ चक्र का पूजन इसी मन्त्र से गन्धाक्षतपुष्पादि से करे। आवाहनादि समस्त उपचारों को भी इसी मन्त्र से करे।

'ततो दिग्भैरवान् भूतानर्चयेत् कुसुमैः परम्।
ततो देवि प्रमथ्याग्निं कुण्डचक्रे कुलेश्वरि।।
बिन्दौ वह्निं समावाह्य मूलेनोज्ज्वालयेच्छिवे।
अग्निं संदीप्य मूलेन प्रणमेद्वह्निमुद्रया।।
मूलेनाहुतिभिर्वह्निं हुनेत् षोडशभिस्ततः।
अष्टोत्तरशतावृत्त्या दद्यदाज्येन पार्वति।।'

अर्थात् पूजित उस चक्र में 8 दिग्भैरवों का और भूतों का पूजन पुष्पों से करें। हे कुलेश्वरि! तत्पश्चात् अरणि मन्थन से अथवा अपनी दीक्षा की परम्परा के अनुसार स्मार्त विधि से अग्नि को प्रज्वलित कर चक्र मध्य में स्थित बिन्दु में स्थापित करें। हे शिवे! उसमें अग्नि देवता का आवाहनादि पूर्वक पूजन पूर्वोक्त अग्नि के मूलमन्त्र से गन्धाक्षतपुष्पादि से करके वह्नि मुद्रा को दर्शाये। पूर्वोक्त अग्नि की मूलमन्त्र से 16 आहुति घी की देकर अग्नि को प्रदीप्त करे। पुनः मूलमन्त्र से ही 108 आहुति घी देकर अग्नि को समस्त संस्कारों से संस्कारित होने की भावाना करें। (वह्निमुद्रा अर्थात् ज्वालिनी मुद्रा को श्रीयन्त्रपूजापद्धतिप्रकाश में देख लें।)

1. वास्तोष्पते प्रतिजानीहि, 2. वास्तोष्पते शग्मया–इति द्वाभ्यां पक्वहविषा; 3. वास्तोष्पते ध्रुवास्थूणां, 4. वास्तोष्पते प्रतरणो, 5. अमीवहा – इति षड्भिः; 6. जातवेद – इत्यादि पंचभिः; 7. सद्योजात – इत्यादि पंचभिः; 8. शन्न इन्द्राग्नी – इत्यादि पंचदर्शग्भिः; 9.

भूरादि व्याहृतिभिश्च एकैकवारं घृतेन जुहुयात्। 10. शन्नो देवेति मन्त्रेण प्रतिद्रव्यं 108 आहुति देयं, तानि च द्रव्याणि – शमीसमिदाज्यं, चर्वाज्यं, पंचगव्याप्लुतदूर्वाज्यं च। शेषेण स्विष्टकृदादि प्रणीता–विमोकान्तं कर्म कर्तव्यम्। वे मन्त्र इस प्रकार हैं –

1. **वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।1।।**
2. **वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः।।2।।**
3. **वास्तो पते ध्रुवा स्थूणां ऽसत्रं सोम्यानाम्। द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा।।1।**
4. **वास्तो पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्द्रो। अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व।।1।।**
5. **अमीवहा वास्तोष्पते विश्वां रूपाण्याविशन्। सख सुशेव एधि नः।।1।। यदर्जुन सारमेय दतः मिषंग यच्छसे। वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप।।2।। स्तेनं राय सारमेय तस्करं वा पुनः सर। स्तोतृनिन्द्रस्य रायसि किमस्मानु दुच्छुनायसे नि षु स्वप।।3।। त्वं सूकरस्य ददृहि तव दर्दर्तु सूकरः। स्तोतृनिन्द्रस्य रायसि किमस्मानु दुच्छुनायसे नि षु स्वप।।4।। सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः। ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः।।5।। य आस्ते यश्च चरति यश्च पश्यति नो जनः। तेषां स हन्मो अक्षाणि यथेदं हर्म्यं तथा।।6।।**
6. **जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः।।1।। तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः।।2।। अग्ने त्वं**

पारया नव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा। भूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः।।3।।
विश्वानि नो दुर्गहा जातवेदस्सिन्धुं न नावा दुरिताऽतिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्।।4।।
पृतनाजितं सहमानमुग्रमग्निं हुवेम परमा सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरिताऽत्यग्निः।।5।।

7. सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व माम्। भवोद्भवाय नमः।।1।। वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः।।2।।
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः।।3।। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्।।4।। ईशानस्सर्वविद्याना-मीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्।।5।।

8. शं न इन्द्रग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या। शमिन्द्रासोमा सुविताय शंयोः शं न इन्द्रापूषणा वाजसातौ।।1।।
शं नो भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु सन्तु रायः। शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु।।2।। शंनो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः। शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु।।3।। शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम्। शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः।।4।। शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु। शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः।।5।। शं न इन्द्रो वसुभिर्देवो अस्तु

शमादित्यभिर्वरुणः सुशंसः। शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्राभिरिह शृणोतु।।6।। शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सनतु यज्ञाः। शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः।।7।। शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तुं। शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः।।8।। शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः। शं नो विष्णुः शमु पूषा नो अस्तु शं नो हवित्रं शम्वस्तु वायुः।।9।। शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः। शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः।।10।। शं नो देवा विश्वदेवा भवन्तु शंसरसवती सह धीभिरस्तु। शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः।।11।। शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः। शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु।।12।। शं नो अज एकपाद देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः। शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा।।13।। आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रिमाणं नवीयः। शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः।।14।। ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः। ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः।।15।।

9. **ॐ भूःस्वाहा, ॐ भुवः स्वाहा, ॐ स्वः स्वाहा** - इति व्याहृतिभिः एकैकवारं घृतेन जुहुयात्।
10. **शं नो देवा विश्वदेवा भवन्तु शंसरसवती सह धीभिरस्तु। शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः।।1।।** इति मन्त्रेण प्रतिद्रव्यं 108 आहुति देयं, तानि च द्रव्याणि - शमीसमिदाज्यं, चर्वाज्यं, पंचगव्याप्लुतदूर्वाज्यं च। शेषेण स्विष्टकृदादि प्रणीताविमोकान्तं कर्म कर्तव्यम्।

5. मन्दिर, यज्ञवेदी तथा राजाओं के भवन केलिये प्रासाद वास्तु

वास्तु के प्रसंग में केवल गृहवास्तु का वर्णन करने से अपूर्णता न हो इसलिये मन्दिर निर्माण अथवा राजा का भवन निर्माण अथवा यज्ञ की वेदी निर्माण करने पर प्रासाद वास्तु का वर्णन करना उचित होगा। जो 64पद का होता है। उसकी संक्षिप्त प्रयोग विधि निम्न प्रकार से है।

अब यजुर्वेदीय पद्धति से (चित्र संख्या 6, पृष्ठ संख्या 139 में दर्शाये गये मण्डल को पीठ पर निर्माण करके रंग भर कर चित्र संख्या 7, पृष्ठ 140 में दर्शाये गये संख्या क्रम से आवाहनादि करें। इस 64 पद वास्तुमण्डल में वास्तुपुरुष की कल्पना करते हुये ईशानकोणस्थ पद के दक्षिणार्ध आदि में प्रदक्षिणा के क्रम से सिर आदि अंगों की कल्पना कर तत्तदंगों में स्थित तत्तद् कोष्टों में शिखी आदि देवताओं का आवाहन करें, क्योंकि कहा है कारिका में – **'ब्रह्माणमादितः कृत्वा शिखिनं वा क्रमेण तु।'** अर्थात् ब्रह्मा से अथवा शिखी से आरम्भ कर वास्तुदेवताओं की स्थापना करनी चाहिये। यहां हम शिखी से आरम्भ कर स्थापना क्रम को दर्शा रहे हैं।

1. ईशानकोणस्थ पद के दक्षिणार्ध में वास्तुपुरुष के सिर की भावना कर उसमें शिखी देवता का आवाहन करें –

   'ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च।1। तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमसे हूमहे वयम्। पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।2। शिखी कर्पूरधवलस्त्रिनेत्रो वृषवाहनः। वरत्रिशूलहस्तश्च वास्तोः शिरसि संस्थितः।3। ॐ भूर्भुवःस्वः शिखिने नमः शिखिनमावाहयामि । भो शिखिन् इह आगच्छ इह तिष्ठ।'

2. उसके दक्षिण में स्थित ड़ेढ़ पद में वास्तुपुरुष की दाहिनी आंख की भावना कर उसमें पर्जन्य देवता का आवाहन करें –

'ॐ शन्नो वातः पवताꣳशन्नस्तपतु सूर्यः। शन्नः कनिक्रदद्देवः पर्जन्योऽअभिवर्षतु ।1। महाँ2ऽइन्द्रो यऽओजसा पर्जन्यो वृष्टिमाँ2इव। स्तोमैर्वावृधे। उपयाम गृहीतोऽसि महेन्द्राय त्वैषते योनिर्महेन्द्राय त्वा ।2। घनस्तडित्वान्पर्जन्यो नानावर्णपरिप्लुतः। ज्योतिर्धूमश्च वातात्मा वास्तोर्दक्ष दिशि स्थितः ।3। ॐ भूर्भुवःस्वः पर्जन्याय नमः पर्जन्यमावाहयामि। भो पर्जन्य इह आगच्छ इह तिष्ठ।'

3. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के दाहिने कान की भावना कर उसमें जयन्त देवता का आवाहन करें –

'ॐ मर्म्माणि ते वर्मणाच्छादयामि सोमस्त्वाराजामृतेनानुव-स्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवामदन्तु ।1। उदुत्यञ्जातवेदसन्देवं वहन्तिकेतवः। दृशे विश्वाय सूर्यम् ।2। जटिलः श्मश्रुलः शीतः कमण्डल्वक्षसूत्रधृक्। जयन्तोऽ-ब्जासनो गौरो वास्तोर्दक्षे ह्यवस्थितः ।3। ॐ भूर्भुवःस्वः जयन्ताय नमः जयन्तमावाहयामि। भो जयन्त इह आगच्छ इह तिष्ठ।'

4. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के दाहिने अंस (दाहिनी गर्दन) की भावना कर उसमें कुलिशायुध (इन्द्र) देवता का आवाहन करें –

'ॐ आयान्त्विन्द्रो वसऽ उपनऽइह स्तुतः सधमादस्तु शूरः। वावृधानस्तविषीर्यस्य पूर्वी द्यौर्नक्षत्रिमभिभूति पुष्यात् ।1। इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः। देवसेनानामभिभञ्जतीनाम्जयन्तीनाम्मरुतो यन्त्वग्रम् ।2। इन्द्र ऐरावतारूढः पीतो दैत्यविमर्दनः। कुलिशाख्यकरो वास्तो-

र्दक्षिणांस समाश्रितः ।3। ॐ भूर्भुवःस्वः इन्द्राय नमः इन्द्रमावाह यामि। भो इन्द्र इह आगच्छ इह तिष्ठ।'

5. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के दाहिने बाहु (कन्धा) की भावना कर उसमें सूर्य देवता का आवाहन करें –
'ॐ बणमहाँ2ऽअसि सूर्य बडादित्यमहाँ2ऽअसि। महस्ते सतो महिमापनस्यतेद्धा देवमहाँ2ऽअसि ।1। सूर्य रश्मिर्हरिकेशः पुरस्ताज्ज्योतिरुदयाँ2ऽअजस्रम्। तस्य पूषा प्रसवे याति विद्वान्सम्पश्यन्विश्वा भुवनानि गोपाः ।2। सूर्यो रक्तो ग्रहाध्यक्षो घृताङ्गो द्विभुजः प्रभुः। सप्ताश्व रथगो वास्तोर्दक्षबाहुसमाश्रितः ।3। ॐ भूर्भुवःस्वः सूर्याय नमः समर्यमावाहयामि। भो सूर्य इह आगच्छ इह तिष्ठ।'

6. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के पुनः दाहिने बाहु की भावना कर उसमें सत्य देवता का आवाहन करें –
'ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।1। सत्यो भूतहितो धर्मो वरदोऽभयपाणिकः। प्रसन्नाब्जासनो ऽब्जाभो दक्षदोरूप-मूलगः ।2। ॐ भूर्भुवःस्वः सत्याय नमः सत्यमावाहयामि। भो सत्य इह आगच्छ इह तिष्ठ।'

7. उसके दक्षिण में स्थित ड़ेढ़ पद में वास्तुपुरुष के दाहिने कूर्पर (ऊपरी कुहनी) की भावना कर उसमें भृश देवता का आवाहन करें –
'ॐ आत्वाहार्षमन्तरभूर्ध्रु वस्तिष्ठा विचाचलिः। विशस्त्वा सर्वावाञ्छन्तु मात्वद्राष्ट्रमधि भृशत् ।1। भायै दार्वाहारम्प्र-भायाऽअग्न्येधम्ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारन्देव लोकाय पेशितारम्मनुष्यलोकाय प्रकरितारꣳसर्वेभ्यो लोकेभ्यऽउपसेक्तारमवऽऋत्यै वधा-

योपमन्थितारमेधाय वासः पल्पूलिम्प्रकामाय रजयित्रीम् ।2। भृशः पुष्पमान स्थः पुष्पज्येक्षुधनुःकरः । गौरो नादरतः कामी दक्षकूर्पर संस्थितः ।3। ॐ भूर्भुवःस्वः भृशाय नमः भृशमा-वाह यामि। भो भृश इह आगच्छ इह तिष्ठ।'

8. उसके दक्षिणाग्नेय में स्थित पद के आधे भाग में वास्तुपुरुष के दाहिने प्रबाहु (कुहनी के जोड़) की भावना कर उसमें आकाश देवता का आवाहन करें –

'ॐ यावां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञम्मिमिक्षितम्। उपयाम गृहीतोस्यश्वि- भ्यां त्वैषतेयाकनिर्माध्वीभ्यान्त्वा ।1। हꣳसः शुचिषद्वसुरन्त-रिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषसद्वरसदृतसद्व्योम-सदब्जा गोजाऽऋतजाऽअद्रिजाऽ ऋतम्बृहत् ।2। शंखचक्रधरो नित्यमसितः स्वस्तिकासनः। सशब्दः सर्वगन्तव्यो कूर्पराधः समाश्रितः ।3। ॐ भूर्भुवःस्वः आकाशय नमः आकाशमा-वाहयामि। भो आकाश इह आगच्छ इह तिष्ठ। ॐ आकाशाय नमः।'

9. उसके पश्चिम में स्थित आधे पद में वास्तुपुरुष के पुनः दाहिने प्रबाहु (निचली कुहनी) की भावना कर उसमें वायु देवता का आवाहन करें –

'ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्वा-न्त्सोमपीतये ।1। अप्स्वग्ने सधिष्टवसौषधीरनुरुद्ध्यसे। गर्भे सञ्जायसे पुनः ।2। वायुधूम्रो मृगारूढो जगत्प्राणश्चलो युवा। ध्वजांकुशे च बिभ्राणो दक्षबाहुसमाश्रितः ।3। ॐ भूर्भुवःस्वः वायवे नमः वायुमावाहयामि। भो वायो इह आगच्छ इह तिष्ठ।'

10. उसके पश्चिम में स्थित ड़ेढ़ पद में वास्तुपुरुष के दाहिने मणिबन्ध की भावना कर उसमें पूषा देवता का आवाहन करें–

'ॐ पूषन्तवव्रते वयन्नरिष्येम कदाचन। स्तोतारस्तऽइह-स्मसि ।1। पूषा पंचाक्षरेण पंचदिशऽउदजयत्ताऽउज्जेषथ्ठसविता षडक्षरेण षड्तूनुदजयत्तानुज्जेषम्बृह स्पतिरष्टाक्षरेण गायत्रामुदजयत्तामुज्जेषम् ।2। महास्वनः शोणवर्णो द्विभुजोऽब्जकमण्डलुः। पूषा गजासनो दक्ष मणिबन्धसमाश्रितः ।3। ॐ भूर्भुवःस्वः पूष्णे नमः पूषणमा-वाहयामि। भो पूषन्निह आगच्छ इह तिष्ठ। ॐ पूष्णे नमः।'

11. उसके पश्चिम में स्थित दो पद में वास्तुपुरुष के दाहिने पार्श्व (ऊपरी बगल) की भावना कर उसमें वितथ देवता का आवाहन करें –

'ॐ तत्सूर्यस्य देवत्वन्तन्महित्वम्मद्ध्या कर्त्तोर्विततथ्ठसञ्जभार। यदेदयुक्तहरितः सधस्थाद्रात्री वासस्तनुते सिमस्मै ।1। सविता प्रथमेऽअहन्नग्निर्द्वितीये वासुस्तृतीयऽ-आदित्यश्चतुर्थे चन्द्रमाः पंचमऽऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे मित्रो नवमे वरुणो दशमऽ इन्द्रऽएकादशे विश्वेदेवा द्वादशे ।2। वितथश्चेन्द्रचापाभो कुबेरप्रति-मासमः। मलवासाऽलसो रिक्तकरो दक्षिण पार्श्वगः ।3। ॐ भूर्भुवःस्वः वितथाय नमः वितथमावाहयामि। भो (निर्ऋतये नमः निर्ऋतिमावाहयामि। भो निर्ऋते) **वितथ इह आगच्छ इह तिष्ठ।'**

12. उसके पश्चिम में स्थित दो पद में वास्तुपुरुष के दाहिने पार्श्व (निचली बगल) की भावना कर उसमें गृहक्षत देवता का आवाहन करें –

'ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत। अस्तोषतस्व भानवो विप्रानविष्ठयामतीयोजान्विन्दते हरी ।1। गृहा मा बिभीतमा-वेपद्ध्वमूर्जम्बिभ्रतऽएमसि। ऊर्जम्बिभ्रद्ध्वः सुमनाः सुमेधा

गृहानैमि मनसा मोदमानः ।2। गृहरक्षकरक्तांगो गदासि-वरचर्मभृत्। पंचास्यवाहनः क्रूरो वास्तोर्दक्षकटिस्थितः ।3। ॐ भूर्भुवःस्वः गृहक्षताय नमः गृहक्षतमावाहयामि। भो गृहक्षत इह आगच्छ इह तिष्ठ।'

13. उसके पश्चिम में स्थित दो पद में वास्तुपुरुष के दाहिने ऊरु की भावना कर उसमें यम देवता का आवाहन करें –

'ॐ यमाय त्वां गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे ।1। असि यमोऽअस्यादित्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ।2। रक्ताक्षो महिषारूढो दण्डपाशधरो यमः। धर्मज्ञो जनसंकाशो वास्तोर्दक्षोरुसंश्रितः ।3। ॐ भूर्भुवःस्वः यमाय नमः यममावाहयामि। भो यम इह आगच्छ इह तिष्ठ।'

14. उसके पश्चिम में स्थित दो पद में वास्तुपुरुष की दाहिनी जानु की भावना कर उसमें गन्धर्व देवता का आवाहन करें –

'ॐ गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः। इन्द्रस्य बाहुरेसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः। मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्टै यजमानस्य परिधिरस्यग्निरिड ईडितः ।1। मुनिवेशधरो गौरो गन्धर्वो ध्यानवान्छुचिः। वीणाकमण्ड लुधरो वास्तोर्वै दक्षजानुगः ।2। ॐ भूर्भुवःस्वः गन्धर्वाय नमः गन्धर्वमावाहयामि ।भो गन्धर्व इह आगच्छ इह तिष्ठ।'

15. उसके पश्चिम में स्थित ड़ेढ़ पद में वास्तुपुरुष की दाहिनी जंघा की भावना कर उसमें भृंगराज देवता का आवाहन करें –

'ॐ सौरीवलाकाशार्ङ्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै

शौरिः पुरुष वाक्छ्वाविद्धौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ।1। कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति। कर्मणे वां देवानाम् ।2। सुनीलांशुर्महाकायः कुंकुमारुणविग्रहः। खट्वाखेटधरो वास्तोर्दक्षजंघा समाश्रितः ।3। ॐ भूर्भुवःस्वः भृंगराजाय नमः भृंगराजमावाहयामि। भो भृंगराज इह आगच्छ इह तिष्ठ।'

16. उसके पश्चिम-नैर्ऋत्य में स्थित आधे पद में वास्तुपुरुष के दाहिने स्फिच (नितम्ब) की भावना कर उसमें मृग देवता का आवाहन करें -

'ॐ मृगोनभीमः कुचरोगिरिष्ठाः परावतऽआजगंथा परस्याः। सृकꣳसꣳशायपविभिंद्ररतिग्मं विशत्रूताद्विविमृधो-नुदस्व ।1। चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।2। मृगो गौरो भूषितांगो वरदाभय पाणिकः। वरासनश्चारुनेत्रो वास्तो-र्दक्षस्फिचि स्थितः ।3। ॐ भूर्भुवःस्वः मृगाय नमः मृगमा-वाहयामि। भो मृग इह आगच्छ इह तिष्ठ।'

17. उसके उत्तर में स्थित आधे पद में वास्तुपुरुष के दोनों पैर की भावना कर उसमें पितृ देवता का आवाहन करें -

'ॐ उशन्तस्त्वा निधीमह्युशंतः समिधी महि। उशन्नुशत ऽआवह पितृन्हविषेऽअत्तवे ।1। पितृभ्यः स्वधायिभ्यः स्व धा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपिता महेभ्यः स्वधायिभ्यः स्वधा नमः। क्षिन्पितरोऽमीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ।2। कुशपिण्ड धराः स्वच्छाः पितरः श्यामलाः कृशाः। महोदराः सोम लोकवासिनो वास्तुपादगाः ।3। ॐ भूर्भुवःस्वः पितृभ्यो नमः पितरमा-वाहयामि। भो पितर इह आगच्छ इह तिष्ठ।'

18. उसके उत्तर में स्थित ड़ेढ़ पद में वास्तुपुरुष के बायें स्फिच (नितम्ब) की भावना कर उसमें दौवारिक देवता का आवाहन करें- '**ॐ द्वेविरूपे चरतः स्वर्थेऽअन्यान्यावत्स मुपधापयेते। हरिरन्यस्यां भवति स्वधावाञ्छुक्रोऽअन्यस्यां ददृशे सुवर्चाः ।1। आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रेराजन्यः शूरऽ-इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वा-नाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयोयुवास्य यजमान-स्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमौ नः कल्पताम् ।2। दौवारिको वेत्रमुद्राधरो भूतिविभूषितः। मुक्ताभः पादुकारूढो वास्तो-र्वामस्फिचिस्थितः ।3। ॐ भूर्भुवःस्वः दौवारिकाय नमः दौवारिकमावाहयामि। भो दौवारिक इह आगच्छ इह तिष्ठ।**'

19. उसके उत्तर में स्थित दो पद में वास्तुपुरुष की बायी जंघा की भावना कर उसमें सुग्रीव देवता का आवाहन करें -
'**ॐ नीलग्रीवाः शितिकण्ठा दिवꣳरुद्राऽउपश्रिताः। तेषाꣳसहस्रयोजने वधन्वानि तन्मसि ।1। सुसमिद्धाय शोचिषे घृतन्तीव्रञ्जुहोतन। अग्नये जातवेदसे ।2। पद्मासनो हेम वर्णः सुग्रीवोऽलंकृतः शुभः। द्विभुजः कामदो वास्तोर्वाम जंघा-समाश्रितः ।3। ॐ भूर्भुवःस्वः सुग्रीवाय नमः सुग्रीव मावाह-यामि। भो सुग्रीव इह आगच्छ इह तिष्ठ।**'

20. उसके उत्तर में स्थित दो पद में वास्तुपुरुष की बायी जानु की भावना कर उसमें पुष्पदन्त देवता का आवाहन करें -
'**ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ।1। नक्षत्रे-भ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाऽअहोरात्रेभ्यः स्वाहार्द्धमासे-**

भ्यः स्वाहा मासेभ्यः स्वाहाऽऋतुभ्यः स्वाहार्त वेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याᳬस्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ।2। पुष्पदन्तोऽभ्रसंकाशः खगः पक्षविराजितः । महाबलो व्यालहस्तो वास्तोर्वै सव्यजानुगः ।3। ॐ भूर्भुवःस्वः पुष्पदन्ताय नमः पुष्पदन्तमावाहयामि। भो पुष्पदन्त इह आगच्छ इह तिष्ठ।'

21. उसके उत्तर में स्थित दो पद में वास्तुपुरुष की बायी ऊरु की भावना कर उसमें वरुण देवता का आवाहन करें –

'ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय। त्वामस्युराचक्रे ।1। वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुण स्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ।2। वरुणः पाथसीनाथो नक्रस्थः पाटलांशुकः। शंखपाशधरः शुभ्रो वास्तोर्वामोरुसंस्थितः ।3। ॐ भूर्भुवःस्वः वरुणाय नमः वरुणमावाहयामि। भो वरुण इह आगच्छ इह तिष्ठ।'

22. उसके उत्तर में स्थित दो पद में वास्तुपुरुष की बायी पार्श्व (निचली बगल) की भावना कर उसमें असुर नामक देवता का आवाहन करें–

'ॐ यमश्विना नमुचेरासुरा दधि रसरस्वत्यसुनोदिन्द्रियाय। इमन्तᳬशुक्रं मधुमन्तमिदᳬ सोमᳬराजानमिह भक्षयामि ।1। ये रूपाणि प्रतिमुच्यमाना ऽअसुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भवन्त्य ग्निष्ठाल्ँलोकात्प्रणुदात्यस्मात् ।2। असुरो मेचकाभासः करालास्योऽगवर्जितः। सिंहारूढ–

श्चारुणाक्षोर्वास्तोर्वाम कटिस्थितः ।3। ॐ भूर्भुवःस्वः असुराय नमः असुरमावाहयामि। भो असुर इह आगच्छ इह तिष्ठ।'

23. उसके उत्तर में स्थित ड़ेढ़ पद में वास्तुपुरुष की बायी पार्श्व (ऊपरी बगल) की भावना कर उसमें शेष देवता का आवाहन करें – '**ॐ याऽइषवो यातुधानानां ये वा वनस्पती ्ँरनु। ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ।1। असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शेषाय स्वाहा सँ्सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लु-चाय स्वाहा दिवापतयते स्वाहा ।2। शेषः कृष्णतनुः शूरो वरशूलेषुचापभृत्। गृध्रपक्षः कृशो दीर्घो वास्तोर्वाम-पर्श्वगः ।3। ॐ भूर्भुवःस्वः शेषाय नमः शेषमावाहयामि। भो शेष इह आगच्छ इह तिष्ठ।'**

24. उसके उत्तर-वायव्य में स्थित आधे पद में वास्तुपुरुष के बायी मणिबन्ध की भावना कर उसमें पाप देवता का आवाहन करें –'**ॐ एतत्ते रुद्रावसंतेन परो मूजवतोतीहि अवतत धन्वा पिनाका वसः कृत्तिवासाऽहिँ्सन्नः शिवोतीहि।1। अग्ने युक्ष्वाहि ये तवाश्चासो देवसाधवः। अरं वहन्ति मन्यवे ।2। पापयक्ष्मा धूम्रवर्णो गदावरदमुद्रितः। कपोतवाहनो वाममणिबन्धसमाश्रितः ।3। ॐ भूर्भुवः स्वः पापाय नमः पापमावाहयामि। भो पाप इह आगच्छ इह तिष्ठ।'**

25. उसके पूर्व में स्थित आधे पद में वास्तुपुरुष की बायीं निचली कुहनी की भावना कर उसमें रोग देवता का आवाहन करें – '**ॐ द्रापेऽअन्धसस्पते दरिद्रन्नीललोहित। आसाम्प्र जानामेषां पशूनाम्माभेर्म्मारोङ्मोचनः किंचनाममत् ।1। शिरो मे**

श्रीर्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणोऽ-अमृतथ्ठसम्राट् चक्षुर्विराट् श्रोत्रम् ।2। रोगः पाशकरो व्यक्तः क्षयात्माव्याधिसंग्रहः। दुष्कर्ममर्दनो वास्तोवामोपबाहु-संश्रितः ।3। ॐ भूर्भुवःस्वः रोगाय नमः रोगमावाहयामि। भो रोग इह आगच्छ इह तिष्ठ।'

26. उसके पूर्व में स्थित ड़ेढ़ पद में वास्तुपुरुष की बायी कुहनी के जोड़ की भावना कर उसमें अहिर्बुध्न्य देवता का आवाहन करें-
'ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिम्परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पु माथ्ठसं परिपातु विश्वतः ।1। नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। येऽ-अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।2। अहिराजोऽब्जगः-शुभ्रः फणामणिविराजितः। अक्षकुण्डी धरो वास्तोर्वाम बाहु संश्रितः ।3। ॐ भूर्भुवःस्वः अहिर्बु ध्न्याय नमः अहिर्बु-ध्न्यमावाहयामि। भो अहिर्बुध्न्य इह आ गच्छ इह तिष्ठ।'

27. उसके पूर्व में स्थित दो पद में वास्तुपुरुष की बायीं ऊपरी कुहनी की भावना कर उसमें मुख्य देवता का आवाहन करें -
'ॐ अवतत्य धनुष्ट्वथ्ठसहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिरो नः सुमना भव।।1। इषे त्वोर्जे त्वा वायवत्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्व-मघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽ अयक्ष्मामावस्तेन-ऽर्शत माघशथ्ठसोद्ध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्य-जमानस्य पशून्याहि ।2। मुख्यो गौरो विश्व कर्मा कुम्भाक्षः पुष्पसूत्रभृत्। निपुणस्तु लुलायस्थो वामकूर्परसंश्रितः ।3। ॐ भूर्भुवःस्वः मुख्याय नमः मुख्यमावाहयामि। भो मुख्य इह आगच्छ इह तिष्ठ।'

28. उसके पूर्व में स्थित दो पद में वास्तुपुरुष की बायीं बाहु की

भावना कर उसमें भल्लाट देवता का आवाहन करें –

'ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहेमतीः। यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्न नातुरम् ।1। घृताच्यसि जुहूर्नाम्ना सेदम्प्रियेण धाम्ना प्रियꣳसदऽआसीद घृताच्यसि ध्रुवानाम्ना सेदम्प्रियेण धाम्ना प्रियꣳसदऽआसीद। ध्रुवाऽसदन्नृतस्य योनौ ता विष्णो पाहि यज्ञम्पाहि यज्ञपतिम्पाहि मां यज्ञन्यम् ।2। भल्लाटश्चन्द्र-संकाशो वरमुद्रागदाधरः। हयपुत्रो वास्तु पुंसोर्वामबाहु-समाश्रितः ।3। ॐ भूर्भुवःस्वः भल्लाटाय नमः भल्लाटमा-वाहयामि। भो भल्लाट इह आगच्छ इह तिष्ठ।।'

29. उसके पूर्व में स्थित दो पद में वास्तुपुरुष के बायें बाहु (कन्धा) की भावना कर उसमें सोम देवता का आवाहन करें – **'ॐ सोमꣳराजानमवसेऽअग्निमन्वारभामहे। आदित्या-न्विष्णुꣳसूर्यं ब्रह्माणं च बृहस्पतिम् ।1। वयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि ।2। सोमो नरविमा-नस्थो वरहस्तो गदाधरः। गौरो महोदरः श्रीमान् वास्तोः सव्यभुजाश्रयः ।3। ॐ भूर्भुवःस्वः सोमाय नमः सोममा-वाहयामि। भो सोम इह आगच्छ इह तिष्ठ।'**

30. उसके पूर्व में स्थित दो पद में वास्तुपुरुष की बायीं अंस (गर्दन) की भावना कर उसमें सर्प देवता का आवाहन करें – **'ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि। योऽअस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रे धोरुगायो विष्णवे त्वा ।1। कुम्भमालाधरां द्वाभ्यां चतु र्बाहुः फणामणिः। सर्पो रक्तभ्रमो वास्तोर्वामांसदेश संश्रितः ।2। ॐ भूर्भुवःस्वः सर्पाय नमः सर्पमावाहयामि। भो सर्प इह आगच्छ इह तिष्ठ।'**

31. उसके पूर्व में स्थित ड़ेढ़ पद में वास्तुपुरुष के बायें कान की भावना कर उसमें अदिति देवता का आवाहन करें –

'ॐ इडऽएह्यदितऽएहि काम्याऽएत। मयि वः कामधारणं भूयात्।1। अदितिर्द्यौरदितिरन्तरिक्षमादितिर्माता स पिता स पुत्रः। विश्वेदेवाऽअदितिः पंचजनाऽअदितिर्जातमदिति र्जनित्वम्।2। सूत्रवज्रांकुशाभीतिर्बिभ्राणा रत्नभूषिता। अदितिश्चारुगौरांगी वास्तोर्वामश्रुतिस्थिता।3। ॐ भूर्भुवःस्वः अदितये नमः अदितिमावाहयामि। भो अदिते इह आगच्छ इह तिष्ठ।'

32. उसके पूर्व में स्थित आधे पद में वास्तुपुरुष की बायीं आंख की भावना कर उसमें दिति देवता का आवाहन करें –

'ॐ ये देवा देवेष्वधि देवत्वमायन्न्ये ब्रह्मणः पुरऽएतारोऽ अस्य। येभ्यो नऽऋते पवते धामकिंचन न ते दिवो न पृथिव्याऽअधिस्नुषु।1। दितिस्तु श्यामवर्णांगी माला त्रिशूलधारिणी। वृषपत्रा वास्तुपुंसोर्वामलोचन संस्थिता।2। ॐ भूर्भुवःस्वः दितये नमः दितिमावाहयामि। भो दिते इह आगच्छ इह तिष्ठ।'

33. मध्य में स्थित पदों में से ईशान पद के उत्तरार्ध पद में अपः देवता का आवाहन करें –

'ॐ आपो हिष्ठामयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे।1। आपो नीला : पीतवस्त्रा धनगाः पद्मभूषणाः। अब्जाक्षपाशपत्राणि बिभ्रन्त्यो वास्तुवक्त्रगाः।2। ॐ भूर्भुवःस्वः अद्भ्यो नमः अपः आवाहयामि। भो आप इह आगच्छ इह तिष्ठ।'

34. मध्य में स्थित पदों में से ईशान पद के दक्षिणार्ध पद में आपवत्स देवता का आवाहन करें –

'ॐ आतेवत्सो मनोजमत्परमाचित्सधस्त्थात्। अग्ने त्वं कामया गिरा।1। इमम्मे वरुण श्रुधीहवमद्याच मृडय। त्वामवस्युराचके।2। आपवत्सो महातेजा द्विभुजो सिंहवाहनः। घटपाशधरो गौरो वास्तेर्वक्षसि संस्थिताः।3। ॐ भूर्भुवःस्वः आप वत्साय नमः आपवत्समावाहयामि। भो आपवत्स इह आगच्छ इह तिष्ठ।'

35. उसके दक्षिण में स्थित दो पद में अर्यमा देवता का आवाहन करें – **'ॐ यदद्य सूरऽउदितेनागा मित्रोऽर्यमा। सुवति सविता भगः।1। ॐ अर्यमणम्बृहस्पति मिन्द्रन्दानाय चोदय। वाचं विष्णुꣳसरस्वतीꣳसवितारं च वाजिनꣳस्वाहा।2। अर्यमा रक्तवर्णस्तु दीप्तिम्राथ वाहनः। द्विपद्मसूत्रखट्वांगपाणि-र्दक्षस्तनश्रितः।3। ॐ भूर्भुवःस्वः अर्यम्णे नमः अर्यमणमा-वाहयामि। भो अर्यमन् इह तिष्ठ।'**

36. उसके दक्षिण में स्थित आग्नेय पद के आधे पद में सावित्र देवता का आवाहन करें –

'ॐ हस्तऽआधाय सविता विभ्रदभिꣳहिरणमयीम्। अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअद्ध्याभरदानुष्टुभेन छन्दसां-गिरस्वत्।1। वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामदुधक्षः।2। सावित्रो द्विभुजः पद्मगौरः पद्मासन स्थितः। वेदपाठरतो वास्तोदक्षहस्ततलाश्रितः।3। ॐ भूर्भुवःस्वः सावित्राय नमः सावित्रमावाहयामि। भो सावित्र इह आगच्छ इह तिष्ठ।'

37. आग्नेय पद के पश्चिम में स्थित आधे पद में सविता देवता का आवाहन करें –

'ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं

तन्नआसुव।1। उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।2। सविता जनिता विश्वं द्विबाहुररुणच्छविः। रथगामी पद्मपाणिर्वास्तोर्क्रोडन्तर स्थितः।3। ॐ भूर्भुवःस्वः सवित्रे नमः सवितारमावाहयामि। भो सवितरिह आगच्छ इह तिष्ठ।'

38. उसके पश्चिम में स्थित दो पद में विवस्वान् देवता का आवाहन करें – **'ॐ विवस्वन्नादित्यैषते सोमपीथस्तस्मिन्मत्स्व। श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः। पुमान्पुत्रो जायते विन्दतेव स्वधा विश्वाहारप एधते गृहे।1। ॐ असि यमोऽअस्यादित्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि।2। विवस्वान्द्विभुजः शोणद्युतिर्दण्डी च पंकजी। कर्म साक्षी रथी वास्तोः क्रोड दक्षिणभागतः।3। ॐ भूर्भुवःस्वः विवस्वते नमः विवस्वन्तमावाहयामि। भो विवस्वन्निह आगच्छ इह तिष्ठ।'**

39. उसके पश्चिम में स्थित नैर्ऋत्य पद के आधे पद में विबुधाधिप देवता का आवाहन करें –

'ॐ सबोधि सूरिर्मघवा वसुपते वसुदावन्। युयोद्ध्यस्मद् द्वेषांसि विश्व कर्मणे स्वाहा।1। सहस्राक्षो गजारूढः पीतांगो विबुधाधिपः। वज्रोत्पलकरः श्रीमान्वास्तोजठरवामगः।2। ॐ भूर्भुवःस्वः विबुधाधिपाय नमः विबुधाधिपमावाहयामि। भो विबुधाधिप इह आगच्छ इह तिष्ठ।'

40. उसके उत्तर में स्थित आधे पद में जयन्त देवता का आवाहन करें – **'ॐ अषाढंय्युत्सु पृतनासु पप्रिꣳस्वर्षामप्सां वृजनस्य गोपाम्। भरेषुजाꣳमुक्षितिꣳसुश्रवसं जयन्तं त्वामनुमदेमसोम।1। यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा**

पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यम्ही-जातन्तेऽअर्वन् ।2। जयो वज्रधरो देवो महोग्रोऽतुलविक्रमः। पीतवर्णो गजारूढो वास्तुदेहसमाश्रितः ।3। ॐ भूर्भुवःस्वः जयाय नमः जयमावाहयामि। भो जय इह आगच्छ इह तिष्ठ।'

41. उसके उत्तर में स्थित दो पद में (जठर के वामभाग में) मित्र देवता का आवाहन करें –

'ॐ मित्रो नऽएहि सुमित्र धऽइन्द्रस्योरुमाविश दक्षिण-मुशन्नुशन्तथ्ठस्योनः स्योनम्। स्वानभ्राजांघारे बंभारे हस्तसुहस्तकृशानवे ते वः सोम क्रयणास्तान्रक्षद्ध्वम्मा-वोदभन् ।1। मित्रस्य चर्षणीधृतो वो देवस्य सानसि। द्युम्नञ्चित्रश्रवस्तमम् ।2। हलाब्जध्वज वज्राख्यहस्तो मित्रो हरिप्रियः। ऊर्ध्वाधः श्यामलो गौरो वास्तोर्जठरसंस्थितः ।3। ॐ भूर्भुवःस्वः मित्राय नमः मित्रमावाहयामि। भो मित्र इह आगच्छ इह तिष्ठ।'

42. उसके उत्तर में स्थित वायव्य पद के आधे पद में (वाम हस्त) राजयक्ष्मा देवता का आवाहन करें –

'ॐ नाशयित्री बलासस्याशसऽउपचितामसि। अथो शतस्य यक्ष्मा णाम्पाकारोरसिनाशनी ।1। वरशक्तिधरो ब्रह्मन्वीर्य वान्बर्हिवाहनः। घण्टाकुक्कुटवान्वास्तोवृषणांशे समाश्रितः ।2। ॐ भूर्भुवःस्वः राजयक्ष्मणे नमः राजयक्ष्माणमावाहयामि। भो राजयक्ष्मन्निह आगच्छ इह तिष्ठ।'

43. उसके पूर्व में स्थित आधे पद में (वाम हस्त) रुद्र देवता का आवाहन करें – **'ॐ अवरुद्रमदीमह्यवदेवं त्र्यम्बकम्। यथा नो वस्यसस्करद्यथा नः। श्रेयसस्कारद्यथा नो व्यव साययात् ।1। या ते रुद्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वाशन्तमया गिरीशन्ताभिचाकशीहि ।2। रुद्रो गोस्थो**

जटी त्र्यक्षो मृगाभयहस्तधृक्। शुभकृदम्बरावासो वास्तु देहसमाश्रितः।3। ॐ भूर्भुवःस्वः रुद्राय नमः रुद्रमावा हयामि। भो रुद्र इह आगच्छ इह तिष्ठ।'

44. उसके पूर्व में स्थित दो पद में (वाम हस्त तल) पृथ्वी धर देवता का आवाहन करें –

'ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी। यच्छानः शर्म सप्रथा।1। यद्ग्रामे यदरण्ये यम्सभायां यदिन्द्रिये। यदेनश्च-कृमा वयमिदन्तद वयजामहे स्वाहा।2। सहस्रवदनः श्रीमान् शंखचक्राख्य कुम्भकृत्। नीलः पृथ्वीधरो वास्तोजठरांशे समाश्रितः।3। ॐ भूर्भुवःस्वः पृथ्वीधराय नमः पृथ्वीधरमा-वाहयामि। भो पृथ्वीधर इह आगच्छ इह तिष्ठ।'

45. मध्य में स्थित चार पद में (हृदय) ब्रह्मा देवता का आवाहन करें –**'ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेनऽआवः। सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनि-मसतश्चविवः।1। अक्षमालां स्रुवं दक्षे वामे दण्ड कमण्डलू। दधानमष्टनयनं यजेन्मध्येऽम्बुजासनम्।2। ॐ भूर्भुवःस्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि। भो ब्रह्मन्निह आगच्छ इह तिष्ठ।'**

46. मण्डल के बाहर प्रथम श्वेत/सत्त्व परिधि में ईशानादि क्रम से चरक्यादि देवताओं का आवाहन करें। ईशान में चरकी का आवाहन करें–

'ॐ यन्ते देवी निर्ऋतिराबबंध पाशं ग्रीवास्वविचृत्यम्।। तन्ते विष्याम्यायुषा नेमध्यादथैतम्पितुमद्धि प्रसूतः। नमो भूत्यै येदं चकार।1। इन्धनास्त्वा शतꣳहिमा द्युमन्तꣳ समिधीमहि। वयस्वन्तो वयस्कृतꣳसहस्वन्तः सहस्रकृतम्।2। कामरूपा विरूपाक्षी कराला चान्त्रभूषणा। कृपाणपात्रं बिभ्राणा मांसरक्तरवप्रिया।3। ॐ भूर्भुवःस्वः चरक्यै नमः

चरकीमावाहयामि। भो चरकि इह आगच्छ इह तिष्ठ।'

47. आग्नेय में विदारी का आवाहन करें – **'ॐ अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधि कल्पिन-मास्कन्दाय सभास्थाणुं मृत्यवेगोव्यच्छमन्तकाय गोघातं क्षुधे योगां विकृतं तं भिक्षमाणऽउपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ।1। असुन्वतमयजमानमिच्छस्तेन स्यात्त्यामन्विहि तस्करस्य। अन्यमस्मदिच्छ सा तऽइत्त्या नमो देवि निर्ऋते तुभमस्तु ।2। ॐ भूर्भुवःस्वः विदार्यै नमः विदारीमावाहयामि। भो विदारि इह आगच्छ इह तिष्ठ।'**

48. नैर्ऋत्य में पूतना का आवाहन करें – **'ॐ इन्द्रस्य क्रोडो दित्यै पाजस्यन्दिशां जत्रवो दित्यै भसज्जीमूतान् हृदयौपशोना-न्तरिक्षम्पुरीतता नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृकाभ्यां गिरीन्प्लाशिभिरुपलान्प्लीह्ना वल्मीकान्क्लोमभि-ग्लौभिर्गुल्मान्हिराभिः स्रवन्तौ ह्रदान्कुक्षिभ्याꣳसमुद्रमुदरेण वैश्वानरं भस्मना ।1। कया नश्चित्रऽआभुवदूति सदावृधः सखा। कया शचिष्ठया वृता ।2। ॐ भूर्भुवःस्वः पूतनायै नमः पूतनामावाहयामि। भो पूतने इह आगच्छ इह तिष्ठ।'**

49. वायव्य में पापराक्षसी का आवाहन करें –

'ॐ यस्यास्ते घोरऽआसंजुहोम्येषाम्बन्धानामवसर्जनाय। यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वां ह परिवेद विश्वतः ।1। इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः। देवसेनानामभिभञ्जतीनाम्जयन्तीनाम्मरुतो यन्त्वग्रम् ।2। ॐ भूर्भुवः स्वः पापराक्षस्यै नमः पापराक्षसीमावाहयामि। भो पापराक्षसि इह आगच्छ इह तिष्ठ।'

50. दूसरी लाल/रज परिधि में पूर्वादि क्रम से स्कन्दादि देवता का आवाहन करें। पूर्व में स्कन्द का आवाहन करें –**'ॐ यत्र**

बाणाः संपतन्ति कुमारा विशिखाऽइव। तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु।1। त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमःशोशचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्।2। ॐ भूर्भुवःस्वः स्कन्दाय नमः स्कन्दमावाहयामि। भो स्कन्द इह आगच्छ इह तिष्ठ।'

51. दक्षिण में अर्यमा का आवाहन करें –
'ॐ यदद्य सरऽउदितेनागामित्रोऽर्यमा। सुवाति सविता भगः।। ॐ भूर्भुवःस्वः अर्यम्णे नमः अर्यमणमावाहयामि। भो अर्यमन्निह आगच्छ इह तिष्ठ।'

52. पश्चिम में जृम्भक का आवाहन करें – 'ॐ हिंकाराय स्वाहा हिंकृताय स्वाहा क्रन्दते स्वाहा अवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयनाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भणाय स्वाहा विचृताय स्वाहा सꣳहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्राणाय स्वाहा।1। सरोभ्यो धैवरमुपस्थवराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलम्पाराय मार्गार-मवाराय कैवर्तन्तीर्थेभ्यऽआन्दं विषमेभ्यो मैनालꣳ स्वनभ्यः पर्णकंगुहाभ्यः किरातꣳसानुभ्यो जृम्भकं पर्वतेभ्यः किम्पूरुषम्।2। ॐ भूर्भुवःस्वः जृम्भकाय नमः जृम्भ-कमावाहयामि। भो जृम्भक इह आगच्छ इह तिष्ठ।

53. उत्तर में पिलिपिच्छ का आवाहन करें –
'ॐ कास्विदा सीत्पूर्वचितिः किꣳस्विदासीद् बृहद्वयः। कास्विदासी त्पिलिपिला कास्विदासीत्पिशंगिला।1।

रक्षोहणं वलगहनं वैष्णवीमिदमहन्तंवलगमुत्किरामि यम्मे निष्ठ्यो यममात्यो निचखानेदमहन्तं वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्यांकिरामि ।2। ॐ भूर्भुवःस्वः पिलिपिच्छाय नमः पिलिपिच्छमावाहयामि। भो पिलिपिच्छ इह आगच्छ इह तिष्ठ।'

54. तीसरी काला/तम परिधि में पुनः पूर्वादि क्रम से दशदिग्पालों का आवाहन करें। पूर्व में – 'ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रम्। ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्ति नो मघवा धात्विन्द्रः।। ॐ भूर्भुवःस्वः इन्द्राय नमः इन्द्रमा वा हयामि। भो इन्द्र इन्द्र इह आगच्छ इह तिष्ठ।'

55. आग्नेय में – 'ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽ-अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्।1। त्वन्नोऽअग्ने तव देव पायुभि-र्मघोनो रक्ष तन्वश्च वन्द्य। त्राता तोकस्य तनये गवामस्य निमेषꣳरक्षमाणस्तव व्रते।2। ॐ भूर्भुवःस्वः अग्नये नमः अग्निमावाहयामि। भो अग्न इह आगच्छ इह तिष्ठ।'

56. दक्षिण में – 'ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे। देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पृश स्पाहि । अर्चिरसि शोचिरसि तपोऽअसि।1। यमाय त्वांगिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे।2। ॐ भूर्भुवःस्वः यमाय नमः यममावाहयामि। भो यम इह आगच्छ इह तिष्ठ।'

57. नैर्ऋत्य में – 'ॐ असुन्वन्तमयजमानमिच्छस्ते नस्येत्यामन्विहि तस्करस्य। अन्यमस्मदिच्छसातऽइत्या नमो देवि निर्ऋते

तुभ्यमस्तु।। ॐ भूर्भुवःस्वः निर्ऋतये नमः निर्ऋतिमा-वाहयामि। भो निर्ऋते इह आगच्छ इह तिष्ठ।'

58. पश्चिम में – **'ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ-सर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽऋतसदनमासीद।1। तत्त्वायामि ब्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः। अहेड मानो वरुणेह बोद्ध्युरुशꣳसमानऽआयुः प्रमोषीः।2। ॐ भूर्भुवःस्वः वरुणाय नमः वरुणमावाहयामि। भो वरुण इह आगच्छ इह तिष्ठ।'**

59. वायव्य में –

'ॐ आनो नियुद्भिः शतिनीभिरध्वर ꣳसहस्रिणीभिरुपयाहि यज्ञम्। वायोऽअस्मिन्त्सवेन मादयस्व यूयं पात स्वस्तिभिः सदा नः।। ॐ भूर्भुवःस्वः वायवे नमः वायुमावाहयामि। भो वायो इह आगच्छ इह तिष्ठ।'

60. उत्तर में –

'ॐ वयꣳसोमव्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि।। ॐ भूर्भुवःस्वः सोमाय नमः सोममवाहयामि। भो सोम (कुबेराय नमः कुबेरमावाहयामि। भो कुबेर) **इह आगच्छ इह तिष्ठ।'**

61. ईशान्य में –

'ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। पूषानो यथा वेद सामसद्वृधेरक्षिता पायुरदब्धः स्वस्तये।। ॐ भूर्भुवःस्वः ईशानाय नमः ईशानमावाह-यामि। भो ईशान इह आगच्छ इह तिष्ठ।'

62. ईशान और पूर्व के बीच में –

'ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्येभरहूतौ सजोषाः। यः शंससते स्तुवते धायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ2ऽअवन्तु देवाः।1। ॐ भूर्भवःस्वः ब्रह्मणे नमः ब्रह्माणमवाहयामि। भो ब्रह्मन्निह आगच्छ इह तिष्ठ।'

63. निर्ऋति और पश्चिम के बीच में –

'ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी। यच्छनः शर्म सप्रथाः।। ॐ भूर्भुवःस्वः अनन्ताय नमः अनन्तमावाह-यामि। भो अनन्त इह आगच्छ इह तिष्ठ।'

तत्पश्चात् वास्तु पीठ में आवाहित समस्त देवताओं को नमस्कार कर प्राणप्रतिष्ठा आदि शेष कर्म पूर्ववत् करें।

6. प्रकारान्तर 81 पद गृहवास्तु

ऊपरी उक्त क्रम से ही 81 पद के गृहवास्तु में भी उक्त देवताओं का आवाहन करके उनकी पूजा की जाती है। जिसमें कुछ पद खाली होते हैं जिन्हें चित्र संख्या 8, पृष्ठ संख्या 140 में दर्शाया गया है।

।। हरिः ॐ तत्सत्।।

पूर्व

उत्तर

लाल	पीला	सफेद	पीला	लाल	सफेद	काला		लाल
पीला	सफेद	सफेद	सफेद	सफेद	सफेद	सफेद	सफेद	
	सफेद	सफेद	काला		लाल		सफेद	सफेद
काला	सफेद	सफेद	सफेद	सफेद	सफेद	सफेद	सफेद	पीला
सफेद	सफेद	लाल	सफेद	सफेद	सफेद		सफेद	काला
काला	सफेद		सफेद	सफेद	सफेद	लाल	सफेद	लाल
लाल	सफेद	सफेद				सफेद	सफेद	काला
	सफेद	सफेद	सफेद	सफेद	सफेद	सफेद	सफेद	पीला
	पीला	काला	पीला	सफेद	लाल	सफेद	लाल	

दक्षिण

पश्चिम

(चित्र संख्या 1)

यजुर्वेदीय वास्तुमण्डल 81 पद 77 देवता

(चित्र संख्या 2)

यजुर्वेदीय गृहवास्तुमण्डल 81 पद 77 देवता

75 76 68 69

62 64

61 54 55

67

22	23	24	25	26	27	28	29	30
53	13	21		2		14	7	31
52	20	12				6	15	32
51								33
50	5			1		3		34
49								35
48	19	10		4		8	16	36
47	11	18				17	9	37
46	45	44	43	42	41	40	39	38

74 60 56 70

65

59 58 57

66 63

73 72 77 71

(चित्र संख्या 3)

यजुर्वेदीय गृहवास्तुमण्डल 81 पद 77 देवता
(प्रकारान्तर)

(चित्र संख्या 4)

(चित्र संख्या 5)

आगमोक्त वास्तुमण्डल 81 पद

(चित्र संख्या 6)

विश्वकर्मप्रकाशोक्तसरजस्कं वास्तुमण्डलम् 64 पद

पूर्व

(चित्र संख्या 7)

यजुर्वेदीय प्रासाद वास्तुमण्डलम् 64 पद

पूर्व

(चित्र संख्या 8)

गृहवास्तु 81 रेखात्मक सरजस्क
(प्रकारान्तर)

प्रासाद वास्तु मण्डलम्

गृहवास्तु 81 रेखात्मक सरजस्क